# “अज्ञातकर्तृकायाः शिवमहिम्नःस्तोत्रटीकायाः समीक्षितं पाठसम्पादनम्”

# Critical Editing of unknown Commentaries on Shivamahimnastotra

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य साहित्यविभागे तत्त्वाचार्य (M.Phil) इति उपाधये प्रस्तुतः लघुशोधनिबन्धः।

A Dissertation Submitted to Shree Somnath Sanskrit University for the Award of Degree of Master of Philosophy (M.Phil) in Sahitya.


| | |
|---|---|
| मार्गदर्शकः | अनुसन्धात्री |
| प्रा. डॉ. नरेन्द्रकुमार पण्ड्या | राधिका प्रेमजीभाई बरासरा |
| प्रधानाचार्यः | एम.ए.,बी.एड. |

श्रीसोमनाथसंस्कृतविश्वविद्यालय-सञ्चालित-

संस्कृतमहाविद्यालयः,वेरावलम्



श्रीसोमनाथसंस्कृतविश्वविद्यालयः

वेरावलम् - ३६२२६६

वर्षम् - २०१९-२०

# प्रतिज्ञापत्रम्

अहं राधिका प्रेमजीभाई बरासरा, श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य साहित्यविभागे तत्त्वाचार्य (M.Phil) इति उपाधये प्रा. डॉ. नरेन्द्रकुमार पण्ड्या महोदयानां मार्गदर्शनेन ''अज्ञातकर्तृकायाः शिवमहिम्नःस्तोत्रटीकायाः समीक्षितं पाठसम्पादनम्'' (Critical Editing of unknown Commentaries on Shivamahimnastotra) इति शीर्षकेण स्वप्रयत्नेन लघुशोधप्रबन्धं लिखितवती। अस्य लघुशोधप्रबन्धस्य कृते सर्वाः सामग्र्यः मया मार्गदर्शकाणां निर्देशानुसारम्, संशोधननियमानां पालनपूर्वकं तथा मातृकाणाम् अवलोकनेन सङ्कलिताः सन्ति। अहं प्रतिज्ञां करोमि यत् अस्मिन् विषये पूर्वं कुत्रापि संशोधनं जातं नास्ति तथा कस्मैचिदपि उपाधये एषः शोधप्रबन्धः प्रदत्तः नास्ति।

स्थलम् - वेरावलम् एवं विनीता

दिनाङ्कः -

राधिका प्रेमजीभाई बरासरा

# कृतज्ञताज्ञापनम्

"अज्ञातकर्तृकायाः शिवमहिम्नःस्तोत्रटीकायाः समीक्षितं पाठसम्पादनम्" इति शीर्षकेण आरब्धः एषः लघुशोधनिबन्धः सम्पन्नः अभवत्। तत्त्वाचार्य इति उपाधये पठनार्थं मम पित्रोः अनुमतिः आशीर्वादः च आसीत् एव, अतः तयोः कृते प्रणामसहितं कृतज्ञभावं प्रकटयामि।

संशोधनस्य विषयचयने परमगुरुः श्रीमान् वसन्तकुमार-भट्टमहोदयः मार्गदर्शनं कृतवान्, तं प्रति वन्दनसहितं धन्यवादभावं प्रकटयामि।

संशोधनस्य कृते मातृकाप्राप्तिः आवश्यकी। मातृकाप्राप्तये आचार्य-कैलाससागरसूरी-ज्ञानमन्दिर-कोबा, गान्धीनगरम् इति संस्थायाः समये समये सहयोगः प्राप्तः अतः ज्ञानमन्दिरस्य सञ्चालकानां कृते व्यवस्थापकानां च कृते धन्यवादवचनानि समर्पयामि।

संशोधनकार्ये आगतानां शङ्कानां निवारणं कृतवतः तथा उचितं मार्गदर्शनं कृतवतः मार्गदर्शकस्य गुरुवरस्य प्रा. डॉ. नरेन्द्रकुमार पण्ड्या महोदयस्य प्रणामसहितं कृतज्ञभावं प्रकटयामि।

संशोधनकार्ये नियमादीनां मार्गदर्शनं कृतवतः तथा मातृकाप्राप्तये विविधसंस्थानां सम्पर्कसूत्रादिप्राप्तये सहायतां कृतवतः गुरोः डॉ. कार्तिक-पण्ड्या-महोदयस्य कृते कृतज्ञतावचनानि समर्पयामि।

लघुशोधप्रबन्धस्य भाषापरिष्कारं टङ्कणपरिष्कारं च कृतवतः तथा समये समये संशोधने अपि सहायतां कृतवतः श्रीजिगरभट्टस्य कृते धन्यवादवचनानि निवेदयामि।

संशोधनकार्ये आवश्यकानां ग्रन्थानां प्राप्तिः श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य ग्रन्थालयतः सरलतया अभवत् अतः ग्रन्थालयकर्मचारिणां कृते धन्यवादवचनानि समर्पयामि।

इत्थम्

राधिका प्रेमजीभाई बरासरा

# श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम् , गुजरातम्

## प्रमाणपत्रम्

“अज्ञातकर्तृकायाः शिवमहिम्नःस्तोत्रटीकायाः समीक्षितं पाठसम्पादनम्” (Critical Editing of unknown Commentaries on Shivamahimnastotra) इत्याख्योऽयं लघुशोधप्रबन्धः आयुष्मत्या राधिका प्रेमजीभाई बरासरा इति नामाख्यया अनुसन्धात्र्या मदीये मार्गदर्शने निर्मितः। अनया अत्र अपेक्षिताः सर्वेऽपि अंशाः यथाविधि स्वप्रयत्नेन संशोधिताः सन्ति। अस्य लघुशोधप्रबन्धस्य निष्कर्षः अस्याः एव अनुसन्धात्र्याः परिश्रमफलम् अस्ति। निर्दिष्टे समयावधौ अनया एषः लघुशोधप्रबन्धः श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य तत्त्वाचार्य (M.Phil) इति उपाधये समर्प्यते इति अहं प्रमाणीकरोमि।

स्थलम् - वेरावलम् इत्थम्

दिनाङ्कः -

मार्गदर्शकः

प्रा. डॉ. नरेन्द्रकुमार पण्ड्या

प्रधानाचार्यः

श्रीसोमनाथसंस्कृतविश्वविद्यालय-सञ्चालित-

संस्कृतमहाविद्यालयः, वेरावलम्

# अनुक्रमः


⁕ **<u>भूमिका</u>**

⁕ **<u>प्रथमं प्रकरणम्</u>- <u>स्तोत्रसाहित्यस्य परिचयः</u>**

१.१ स्तोत्रसाहित्यस्य उद्भवः

१.२ स्तोत्रसाहित्यस्य विकासक्रमः

१.२.१ रामायणे स्तोत्राणि

१.२.२ महाभारते स्तोत्राणि

१.२.३ पुराणेषु स्तोत्राणि

१.२.४ महाकाव्येषु स्तुतयः

१.२.५ स्वतन्त्रस्तोत्रकाराः तेषां स्तोत्राणि च

१.३ कानिचन प्रसिद्धानि स्तोत्राणि

१.३.१ विष्णुस्तोत्राणि

१.३.२ शिवस्तोत्राणि

१.३.३ देवीस्तोत्राणि

१.३.४ अन्यानि स्तोत्राणि

१.४ स्तोत्रसाहित्ये शिवमहिम्नःस्तोत्रस्य स्थानम्

**<u>⁕ द्वितीयं प्रकरणम् - "पाठसम्पादनपद्धतिः"</u>**

**⁕ तृतीयं प्रकरणम् - “अज्ञातकर्तृकायाः शिवमहिम्नःस्तोत्रटीकायाः मातृकायाः परिचयः”**

३.१ मातृकायाः प्राप्तिस्थानम्

३.२ मातृकायाः कर्ताः

३.३ मातृकायाः कालः

३.४ मातृकायाः कलेवरम्

**⁕ चतुर्थं प्रकरणम् - “मूलग्रन्थः”**

**⁕ पञ्चमं प्रकरणम् - “समीक्षितं पाठसम्पादनम्”**

**⁕ उपसंहारः**

## ।।श्रीसरस्वत्यैनमः।।

# भूमिका

प्राचीने काले सर्वविधं ज्ञानं प्रायः श्रुतिपरम्परया एव प्रचलितं विस्तारितं च भवति स्म। अतः एव वेदानाम् अपरं नाम श्रुतिः इति अस्ति। वस्तुतः तु तस्मिन् काले मानवानां बुद्धिः तीक्ष्णा भवति स्म। तस्मात् ग्रन्थानां काऽपि आवश्यकता न भवति स्म। कालक्रमेण शनैः शनैः जनानां बुद्धिः क्षीणा अभवत् अतः ज्ञानस्य स्थिरता आवश्यकी अभवत्। अनेन प्रकारेण श्रुतिपरम्परा पठनपरम्परा अभवत्। पठनं लेखनं च तदा एव उद्भूतम्। पाणिनीयशिक्षायां पाठकस्य दोषाः निर्दिष्टाः सन्ति यथा -

**“गीती शीघ्री शिरः कम्पी तथा लिखितपाठकः।**

**अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाऽधमाः।।”**[1]

अस्मिन् श्लोके लिखितपाठकः इति शब्दः अस्ति। तस्य अर्थः भवति लिखितस्य पाठकः। अर्थात् तस्मिन् काले लेखनं तथा लेखनस्य पाठनम् आरब्धम् आसीत्।

ग्रन्थस्य लेखनं लिपिकः करोति स्म। सः मूलग्रन्थं पठित्वा तस्य ग्रन्थस्य अनेकाः प्रतिलिपीः करोति स्म। तस्मिन् काले यन्त्राणि न आसन् अतः प्रत्येकग्रन्थस्य लेखनं भवति स्म। यदा लिपिकः एकं ग्रन्थं दृष्ट्वा प्रतिलिपिं करोति तदा प्रमादतः दोषाः अपि भवन्ति। अनेन कारणेन दोषयुक्तः पाठः प्रचलितः भवति। कदाचित् लिपिकः स्वस्य पाण्डित्यं प्रदर्शयितुं स्वयमेव मूलग्रन्थस्य पाठं परिवर्तनं कृत्वा लिखति। एवं रीत्या मूलग्रन्थस्य हानिः भवति तथा रचनाकारस्य लिखितः मूलग्रन्थः दूरे तिष्ठति, लिपिकारस्य प्रतिलिपिः च प्रचलिता भवति। यावत् पर्यन्तं मूलग्रन्थस्य प्राप्तिः न भवति तावत् पर्यन्तं तस्य ग्रन्थस्य साहित्यिकं मूल्याङ्कनम् अपि न भवति।

---

[1] पाणिनीयशिक्षा-32

वर्तमानसमये एतादृश्यः प्रतिलिपयः अधिकाः प्राप्यन्ते। तासु संशोधनं समीक्षणं च पाठसम्पादकाः पाठसमीक्षकाः च कुर्वन्ति। यथाशक्यं ग्रन्थतः दोषाणां पाठभेदानां च संशोधनं कृत्वा पाठसमीक्षकाः प्रायः मूलपाठस्य समीपस्थं पाठं प्रस्तुवन्ति। अनेन प्रकारेण महाभारतस्य रामायणस्य च पाठसम्पादनं प्रमुखतया अभवत् अन्यग्रन्थानाम् अपि समीक्षितं पाठसम्पादनं वर्तमानकाले भवति।

मातृकासु प्रायः सर्वेषां शास्त्राणां ग्रन्थाः भवन्ति। दार्शनिकग्रन्थाः काव्यनाट्य-ग्रन्थाः टीकाग्रन्थाः अन्यग्रन्थाः च मातृकारूपेण प्राप्यन्ते। मातृकाः तु विविधासु लिपिषु भवन्ति अतः मातृकायाः लिप्यन्तरणं कृत्वा प्रकाशनं करणीयम्। तेन मातृकायां स्थितं ज्ञानं सर्वे जनाः प्राप्तुं शक्नुवन्ति। लिप्यन्तरणं कर्तुं लिपिज्ञानम् अतीव आवश्यकम् अस्ति।

यथा मूलग्रन्थाः मातृकारूपेण सन्ति तथैव तेषां ग्रन्थानां टीकाः अपि मातृकारूपेण सन्ति। टीकासु प्रायः दार्शनिकग्रन्थानां काव्यानां नाटकानां विविधस्तोत्राणां च टीका भवन्ति। टीकाः ग्रन्थस्य विशिष्टं भावं प्रकटयन्ति। अहम् अपि मातृकायाः लिप्यन्तरं कृत्वा किमपि संशोधनं करोमि इति मम ईच्छा आसीत्। किन्तु वस्तुतः किं कथं च करोमि इति संशयः आसीत् तदा गुजरातस्य प्रसिद्धः विद्वान् प्रो.डॉ.वसन्तकुमारः भट्टः मम सहायतां कृतवान्। सः उक्तवान् यत् **“शिवमहिम्नःस्तोत्रस्य अज्ञातकर्तृका टीका कोबासङ्ग्रहालये अस्ति तस्याः समीक्षितं पाठसम्पादनं करोतु।”** इति। अतः अहं गान्धिनगरं गत्वा **“आचार्यश्रीकैलाससागरसूरिज्ञानमन्दिर-कोबा”** तः शिवमहिम्नस्तोत्रस्य तिस्रः टीकाः प्राप्तवती। तासु एकस्याः चयनं कृत्वा मम तत्वा चार्यस्य लघुशोधनिबन्धे तस्याः टीकायाः समीक्षितं पाठसम्पादनं करिष्यामि इति निश्चयः अभ वत्।

एतस्मिन् लघुशोधनिबन्धे पञ्च प्रकरणानि भविष्यन्ति। प्रथमे प्रकरणे स्तोत्रसा-हित्येस्य उद्भवं विकासपरम्परां च लिखित्वा शिवमहिम्नःस्तोत्रस्य महत्वं निरूपयामि। द्वितिये प्रकरणे पाठसम्पादनस्य सिद्धान्तान् लिखिष्यामि। तृतीये प्रकरणे प्रस्तुत-मातृकायाः परिचयं प्रदास्यामि। चतुर्थे प्रकरणे मूलग्रन्थं लिप्यन्तरसहितं स्थापयामि।

पञ्चमे प्रकरणे अस्याः टीकायाः समीक्षितं पाठसम्पादनं करिष्यामि। अनेन प्रकारेण म-म संशोधनस्य रूपरेखा भविष्यति।प्रस्तुतं संशोधनं लघु कलेवरं धरति यतो हि एषः मम संशोधनकार्ये आरम्भः अस्ति। शिवमहिम्नःस्तोत्रस्य पद्यानां टीकां दृष्टवा पठित्वा च विशेषरीत्या अर्थबोधः भविष्यति। एषा टीकाः अद्यावधि अप्रकाशिता अस्ति अतः अस्याः प्रकाशनं जिज्ञासूनां तथा शोधच्छात्राणां कृते लाभप्रदं भविष्यति इति आशां करोमि।

# प्रथमं प्रकरणम् - “स्तोत्रसाहित्यस्य परिचयः”

स्तूयते अनेन इति स्तोत्रम्। स्तु धातोः ष्ट्रन् प्रत्यये सति स्तोत्रम् इति शब्दः सिद्धः भवति। स्तोत्रम् अर्थात् स्तवनं स्तुतिः गुणादिप्रशंसनम्। “स्तोत्रम्” हृदयस्य भाषा अस्ति। भक्तः दीनः भूत्वा स्वस्य आराध्यस्य गुणगानं कर्तुं यस्य प्रयोगं करोति तत् स्तोत्रम्। स्तोत्रे भावतत्वं प्रधानं भवति। वायुपुराणे चतुर्विधं स्तोत्रं कथितं यथा-

**“द्रव्यस्तोत्रं गुणस्तोत्रं कर्मस्तोत्रं तथैव च।**

**चतुर्थमाभिजनिकं स्तोत्रमेतच्चतुर्विधम्।।”**[2]

अर्थात् द्रव्यस्तोत्रम्, गुणस्तोत्रम्, कर्मस्तोत्रम्, आभिजनिकस्तोत्रम् इति चतुर्विधं स्तोत्रम् अस्ति। यत्र द्रव्यस्य स्तवनं भवति तत् द्रव्यस्तोत्रम्। यत्र गुणानां स्तवनं भवति तत् गुणस्तोत्रम्। यत्र कर्मणः स्तवनं भवति तत् कर्मस्तोत्रम्। यत्र च नामसङ्कीर्तनं भवति तत् आभिजनिकं स्तोत्रं भवति। एतस्य स्तोत्रस्य उद्भवः कथम् अभवत्? कथं च विकासः अभवत्? इति अत्र लिख्यते।

### १.१ स्तोत्रसाहित्यस्य उद्भवः -

स्तोत्रसाहित्यस्य परम्परा अतीव प्राचीना अस्ति। स्तुतिः अथवा स्तोत्रं समानम् एव अस्ति। वैदिककाले देवतानां स्तुतिः भवति स्म। अतः स्तोत्रस्य उद्भवः वैदिककाले अभवत् इति वक्तुं शक्नुमः। प्राचीनः वेदः ऋग्वेदः अस्ति। तस्य प्रथमे अध्याये अग्नेः स्तुतिः अस्ति यथा-

**“अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम्। होतारं रत्नधातमम्।।”**[3]

ऋग्वेदः तु स्तुतेः भण्डागारः अस्ति। स्थाने स्थाने विविधानां देवतानां स्तुतयः ऋग्वेदे सन्ति। कुत्रचित् अभीष्टप्राप्त्यर्थं, कुत्रचित् रक्षणार्थं, कुत्रचित् ज्ञानार्थम् ऋषयः स्तुतिं कुर्वन्ति स्म। वेदेषु यासां देवतानां स्तुतयः सन्तिः ताः प्रायः प्राकृतिकाः सन्ति। यथा अग्निः, सविता, इन्द्रः,

---

[2] वायुपुराण - ५९/५८

[3] ऋग्वेदः-१/१/१

वरूणः, उषा, मरुद्, रूद्रः इत्यादयः। मनुष्यः प्राचीनकालात् एव प्रकृत्या सह जीवति। अतः प्रकृत्याः आवश्यकं तत्वं देवतारूपेण स्तुवन्ति मनुष्याः। शैत्यात् रक्षणाय अग्निः, प्रकाशार्थं सूर्यः, श्वसनार्थं वायुः, वर्षार्थम् इन्द्रः, आरोग्यरक्षणार्थम् अश्विनीकुमारौ इत्यादयः देवाः प्रकृतिरूपाः सन्ति। तेषां स्तुतिम् ऋषयः कुर्वन्ति स्म।

ऋग्वेदे द्विविधाः स्तुतयः सन्ति अध्यात्मरूपाः सकामाः च। यत्र सृष्टेः विज्ञानम्, आत्मतत्त्वनिरूपणं, ब्रह्मणः स्वरुपं, ज्ञानस्य चर्चा च भवति सा अध्यात्मस्तुतिः अस्ति। अध्यात्मस्तुतिद्वारा परमात्मनः व्यापकत्वं श्रेष्ठत्वं च वर्णितं भवति। अध्यात्मस्तुतिमध्ये प्रमुखम् अस्ति पुरुषसूक्तम्। पुरुषसूक्ते मन्त्रेषु परमात्मनः विराट् स्वरूपं तथा सृष्टेः उत्पत्तिविषयं निरूपणं वर्तते। नासदीयसूक्तं मेधासूक्तम् अन्यसूक्तानि च अध्यात्मरूपाणि सन्ति।

सकामस्तोत्रेषु अग्निसूक्तम्, इन्द्रसूक्तं, पर्जन्यसूक्तम्, उषस्सूक्तम् अन्यानि च सूक्तानि सन्ति। कामनापूर्त्यर्थं धनादिऐश्वर्यप्राप्त्यर्थं च वेदेषु एतेषां देवानां स्तुतिः अस्ति। युद्धे विजयार्थम् इन्द्रस्य स्तुतिः, आरोग्यरक्षणार्थम् अश्विनीकुमारयोः स्तुतिः, अभीष्टप्राप्त्यर्थं विष्णोः स्तुतिः, स्वास्थ्यसंरक्षणाय अन्नादिप्राप्त्यर्थं च सूर्यस्य स्तुतिः अस्ति। अनेन प्रकारेण सकामस्तुतिः अपि भवति।

यदुर्वेदे अपि पुरुषसूक्तम्, शिवसङ्कल्पसूक्तम्, ईशावास्योपनिषद् दार्शनिकदृष्ट्या महत्वपूर्णम् अस्ति। सृष्टिविज्ञानम्, मनसः विज्ञानम् आत्मनः च विज्ञानम् अत्र वर्णितम् अस्ति। सामवेदः तु गीतिप्रधानः अस्ति। यज्ञेषु उद्गाता ऋग्वेदस्य ऋचां गानं कृत्वा देवानाम् आह्वानं करोति। आह्वानम् अपि स्तुतिसहितम् एव भवति। तथैव अथर्ववेदे पृथिव्याः स्तुतिः प्रसिद्धा अस्ति। पृथिव्याः दार्शनिकं, तात्त्विकं, भौतिकं च स्वरूपम् अत्र वर्णितम् अस्ति। अनेन प्रकारेण वेदानां स्तुतिसमूहं दृष्ट्वा वक्तुं शक्यते यत् स्तोत्रस्य उद्भवः वैदिककाले अभवत् इति।

**१.२ स्तोत्रसाहित्यस्य विकासक्रमः -**

वैदिककाले वैदिकानां देवतानां स्तुतिरूपेण स्तोत्रस्य उद्भवः अभवत्। कालक्रमेण रामायणे महाभारते पुराणेषु साहित्यग्रन्थेषु च स्वरूपपरिवर्तनेन सह स्तोत्रसाहित्यस्य विकासः अभवत्। प्रसङ्गानुसारं रामायणादिषु यस्य कस्यापि देवस्य स्तुतिः कृता अस्ति। ततः शङ्कराचार्यादयः आचार्याः स्वतन्त्रतया स्तोत्राणि विरचितवन्तः। अत्र स्तोत्रस्य विकासः कया रीत्या अभवत् इति प्रस्तूयते।

**१.२.१ रामायणे स्तोत्राणि -**

वैदिकसाहित्ये स्तोत्रं बीजरूपम् आसीत् यस्य विकासः रामायणेन सह आरब्धः अभवत्। रामायणम् आदिकाव्यम् अस्ति अतः लौकिकस्तोत्राणाम् उद्भवः तु रामायणे एव जातः। रामायणे विविधेषु स्थानेषु विविधकामनापूर्त्यर्थं तथा प्रभोः गुणानुकीर्तनं कर्तुं स्तुतयः कृताः सन्ति। रावणात् त्रस्ताः भीताः देवाः ब्रह्मणः स्तुतिं कुर्वन्ति।[4] ब्रह्मादयः देवाः पुनः विष्णोः स्तुतिं कुर्वन्ति।[5] रावणः सर्वान् पीडयति अतः तस्य नाशाय एषा स्तुतिः अस्ति। एषा सकामस्तुतिः अस्ति। युद्धकाण्डे १०५ तमः सर्गः "आदित्यहृदयस्तोत्रम्" इति नाम्ना प्रसिद्धः अस्ति। अस्य स्तोत्रस्य अतीव माहात्म्यम् अस्ति। युद्धभूमौ रावणस्य पुरतः स्थितः रामः अगत्स्यवचनात् सूर्यस्य स्तुतिं करोति। एतस्य स्तोत्रस्य पाठेन शत्रूणां नाशः भवति तथा सर्वविधं कल्याणं भवति। तत्र उक्तं यत् -

**"आदित्यहृदयं पुण्यं सर्वशत्रुविनाशनम्।**
**जयावहं जपेन्नित्यमक्षय्यं परमं शिवम्।।"**[6]

---

[4] वाल्मीकि रामायणम् - ०१/१५/६ तः १४ श्लोकाः

[5] तत्रैव - ०१/१५/१९ तः २६ श्लोकाः

[6] तत्रैव - ०६/१०५/४

“आदित्यहृदयस्तोत्रस्य पाठेन सूर्यं पूजयित्वा रामः रावणं मारयिष्यति” इति अगत्स्यः कथयति। आपत्तियुक्तः मानवः तथा भयभीतः नरः एतस्य स्तोत्रस्य पाठेन दुःखमुक्तः भवति। विजयार्थं रामः अस्य स्तोत्रस्य पाठं करोतु इति अगत्स्यः आज्ञापयति। तत्र उक्तं यत्-

**“पूजयस्वैनमेकाग्रो देववेदं जगत्पतिं।**

**एतत्त्रिगुणितं जस्वा युद्धेषु विजयिष्यसि।।”[7]**

एतस्मिन् आदित्यहृदयस्तोत्रे ३१ श्लोकाः सन्ति। तत्रैव युद्धकाण्डे रावणस्य वधानन्तरं देवाः रामस्य स्तुतिं कुर्वन्ति। स्वयं ब्रह्मा वदति यत्

**“त्रीँल्लोकान् धारयन् राम देवगन्धर्वदानवान्।**

**अहं ते हृदयं राम जिह्वा देवी सरस्वती।।”[8]**

अर्थात् हे राम! त्वं त्रीन् लोकान् तथा देव-गन्धर्व-दानवान् धारयन् असि। अहं तव हृदयं तथा सरस्वती देवी तव जिह्वा अस्ति। एतस्मिन् स्तोत्रे २० श्लोकाः सन्ति। स्तोत्रस्य माहात्म्यं स्वयं ब्रह्मा वदति यत्-

**“इममार्षं स्तवं दिव्यमितिहासं पुरातनम्।**

**ये नराः कीर्तयिष्यन्ति नास्ति तेषां पराभवः।।”[9]**

अर्थात् ये अस्य दिव्यस्तोत्रस्य कीर्तनं करिष्यन्ति तेषां कुत्रापि पराभवः न भविष्यति इति। एवम् उत्तरकाण्डे शिवस्तुतिः विष्णुस्तुतिः तथा अन्याः अपि स्तुतयः सन्ति। रामायणस्य स्तोत्राणि वेदप्रभावितानि सन्ति इति दृश्यते। वेदानां स्तुतिः रामायणे विकसिता अस्ति। लौकिककाव्यस्य उद्भवेन सह रामायणे लोकिकस्तोत्रस्य अपि उद्भवः अभवत् इति वक्तुं शक्नुमः।

**१.२.२ महाभारते स्तोत्राणि -**

---

[7] तत्रैव - ०६/१०५/२६

[8] तत्रैव - ०६/११७/२३

[9] तत्रैव - ०६/११७/३२

महाभारतं विश्वकोशः अस्ति। तत्र यत् अस्ति तत् सर्वत्र अस्ति, तत्र यत् नास्ति तत् कुत्रापि नास्ति इति प्रसिद्धम् अस्ति। महाभारते विविधेषु प्रसङ्गेषु विविधानि स्तोत्राणि सन्ति। सामान्यवर्गः, राजवर्गः, ऋषिवर्गः, देववर्गः, अन्यवर्गाः च महाभारते स्थाने स्थाने स्तुतिं कुर्वन्ति इति दृश्यते। भीष्मः, व्यासः, युधिष्ठिरः, ध्रुवः इत्यादयः ज्ञानयुक्ताः स्तोतारः सन्ति। एतेषां स्तुतिमध्ये अध्यात्मभावः भवति। महाभारतस्य स्तोत्रेषु केषाञ्चित् अतीव महत्वम् अस्ति।

बाणशय्यायाः उपरि भीष्मः आसीत् तदा सः श्रीकृष्णस्य विराट्स्वरूपस्य स्तुतिं कृतवान्। एषा स्तुतिः "भीष्मस्तवराजः" इति नाम्ना प्रसिद्धा अस्ति। नामतः एव ज्ञायते यत् एषः स्तवनानां राजा अर्थात् अतीव महत्वपूर्णः अस्ति। एतस्मिन् स्तोत्रे ८९ श्लोकाः सन्ति। मरणासन्नः भीष्मः कृष्मस्य स्तुतिं करोति।[10] तस्याः अतीव प्रसिद्धः श्लोकः एषः -

**"नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च।**

**जगद्धिताय कृष्णाय गोविन्दाय नमो नमः।।"[11]**

स्तोत्रस्य अन्ते स्वयं श्रीकृष्णः स्तोत्रस्य माहात्म्यं कथयति यत् यः नरः इदं स्तोत्रं पठिष्यति तस्य कृते देवलोकात् अपि उत्तमः मम लोक इव लोकः भविष्यति इति।[12]

वनपर्वणि अर्जुनः शिवस्य स्तुतिं करोति। शिवः प्रसन्नः भूत्वा पाशुपतास्त्रं ददाति। एषा स्तुतिः वनपर्वणि ३९ तमे अध्याये अस्ति। सभापर्वणि द्रौपद्याः अपमानं भवति तथा भीष्मादीनाम् उपस्थितिमध्ये अपि वस्त्राहरणं भवति तदा द्रौपदी श्रीकृष्णस्य स्तुतिं करोति। एषा स्तुतिः सभापर्वणि ६८ तमे अध्याये अस्ति। विराट्पर्वणि युधिष्ठिरः विजयप्राप्त्यर्थं दुर्गायाः स्तुतिं करोति। दुर्गा प्रसन्ना भूत्वा तस्मै विजयस्य वरदानं ददाति। एषा स्तुतिः विराट्पर्वणि षष्ठे अध्याये अस्ति।

---

[10] कृताञ्जलिः शुचिर्भूत्वा वाग्विदां प्रवरः प्रभुः।
भीष्मः परमधर्मात्मा वासुदेवमथास्तुवन्।।(म.भा.शा.प.- ४७/१७)

[11] महाभारतम्,शा.प.- ४७/१०२

[12] यः सम्पठेदिदं स्तोत्रं मम जन्मानुकीर्तनम्।
देवलोकमतिक्रम्य तस्य लोको यथा मम।।(तत्रैव-शा.प.-४७/१२३)

दक्षः प्रजापतिः यज्ञविध्वंसस्य अनन्तरं शिवस्य स्तुतिं करोति सा स्तुतिः "शिवसहस्रनामस्तोत्रम्" इति नाम्ना प्रसिद्धा अस्ति। तथैव अनुशासनपर्वणि भीष्मस्य युधिष्ठिरस्य च संवादे विष्णोः सहस्रनाम्नां कीर्तनं भवति तत् "विष्णुसहस्रनामस्तोत्रम्" इति नाम्ना प्रसिद्धम् अस्ति।

इत्थं महाभारते स्तोत्रस्य विकसितं स्वरूपं दृश्यते। रामायणे यादृशाणि स्तोत्राणि सन्ति तादृशाणि आध्यात्मिकानि स्तोत्राणि महाभारते अपि सन्ति। तदतिरिच्य "सहस्रनामस्तोत्रम्" इति नामकीर्तनस्तोत्रप्रकारः महाभारते दृश्यते। अनेन प्रकारेण महाभारते स्तोत्राणां विकासः जातः इति अत्र निरूपितम्।

**१.२.३ पुराणेषु स्तोत्राणि -**

पुराणेषु कामनारहितानि भक्तिपूर्णानि स्तोत्राणि अधिकानि भवन्ति। विविधाः भक्ताः प्रभोः स्तुतिं कुर्वन्ति। तासु अनेकाः प्रसिद्धाः अपि सन्ति। पुराणस्तोत्रेषु भावमाधुर्यम् अधिकं भवति। पुराणेषु स्तोत्रस्य विभिन्न-प्रकाराणि सन्ति यथा अष्टकम्, कवचम्, नामस्तोत्रम् इत्यादि आध्यात्मिकानि स्तोत्राणि अपि पुराणेषु सन्ति।

प्रमुखेषु अष्टकेषु गणेशाष्टकं पद्मपुराणे अस्ति। शीतलाष्टके शीतलारोगस्य निवारणाय उपायाः सन्ति। पद्मपुराणे सङ्कटाष्टकम् अस्ति यस्य पाठेन सङ्कटस्य तीर्थराजप्रयागस्य महत्त्वं प्रयागाष्टके निरूपितम् अस्ति।

कवचेषु अतिप्रसिद्धं श्रीनारायणकवचं श्रीमद्भागवतपुराणे अस्ति। देवपुरोहितः विश्वरूपः इन्द्राय इदं स्तोत्रं श्रावयति। तस्य फलेन इन्द्रः वृत्रासुरं जयति। मार्कण्डेयपुराणे प्रभावयुक्तं देवीकवचम् अस्ति। सप्तशतीपाठात् पूर्वम् एतस्य देवीकवचस्य पाठः भवति। तेन भगवती दुर्गा दिग्भ्यः रक्षणं करोति। ब्रह्माण्डपुराणे तुलसीकवचम् अस्ति। अत्र तुलसीमहत्त्वं वर्णितम् अस्ति। ब्रह्मवैवर्तपुराणे सरस्वतीकवचम्, सूर्यकवचम्, श्रीराधिकाकवचम्, श्रीकृष्णकवचम्, महालक्ष्मीकवचम्, लक्ष्मीकवचम्, दुर्गाकवचम् इत्यादीनि कवचस्तोत्राणि सन्ति। कवचस्तोत्राणां पाठेन पाठकस्य सर्वविधं रक्षणं भवति।

नामस्तोत्रेषु अपि कानिचन अतीव प्रसिद्धानि सन्ति। ब्रह्मवैवर्तपुराणे गणेशाष्टनामस्तोत्रम्, वामनपुराणे विष्णोरष्टनामस्तोत्रम्, विष्णोः शतनामस्तोत्रम्, स्कन्दपुराणे गङ्गासहस्रनामस्तोत्रम्, भविष्योत्तरपुराणे सूर्यसहस्रनामस्तोत्रम्, स्कन्दपुराणे केतुपञ्चविंशतिनामस्तोत्रम् इत्यादीनि नामस्तोत्रेषु प्रसिद्धानि सन्ति। नामस्तोत्रेषु प्रायः अष्ट, शतम्, अष्टोत्तरशतम्, सहस्रं च नामानि भवन्ति। पूजादिषु एतेषां नामस्तोत्राणां पठनं ब्राह्मणाः कुर्वन्ति तेन एतेषां महत्त्वं ज्ञायते।

अध्यात्मस्तोत्रेषु अतीव प्रसिद्धा भीष्मस्तुतिः अस्ति। एषा स्तुतिः श्रीमद्भागवतपुराणे प्रथमे स्कन्धे नवमे अध्याये अस्ति। एतस्याः स्तुतेः गानस्य अतीव महत्त्वम् अस्ति। स्तुतिमध्ये एकादश श्लोकाः सन्ति। तत्रैव अष्टमे अध्याये कुन्ती श्रीकृष्णस्य स्तुतिं कृतवती। तत्र २६ श्लोकाः सन्ति। श्रीकृष्णस्य अवतारस्य तथा अविनाशितत्त्वस्य कुन्ती स्तुतिं करोति। तृतीये स्कन्धे त्रयोदशाध्याये ऋषयः वराहस्वरूपस्य भगवतः स्तुतिं कुर्वन्ति। अत्र द्वादशश्लोकाः सन्ति। वराहस्य परब्रह्मत्वम् एतस्यां वर्णितम् अस्ति। चतुर्थे स्कन्धे शिवस्तुतिः विष्णुस्तुतिः तथा ध्रुवकृता भगवत्स्तुतिः अस्ति। ध्रुवद्वारा या स्तुतिः भवति तस्यां द्वादशश्लोकाः सन्ति। एषा अतीव प्रसिद्धा अस्ति। तथैव श्रीमद्भागवतमहापुराणे षष्ठे स्कन्धे वृत्रासुरचतुःश्लोकी बहुप्रसिद्धा अस्ति। तदतिरिच्य प्रख्यातस्तोत्रेषु प्रह्लादकृता नृसिंहस्तुतिः सप्तमस्कन्धे, अष्टमस्कन्धे गजेन्द्रकृता भगवत्स्तुति, दशमस्कन्धे गर्भस्तुतिः, ब्रह्मणः मोहभङ्गावसरे तेन कृता श्रीकृष्णस्य स्तुतिः, गोपीगीतम्, युगलगीतम्, वेणुगीतम्, वेदस्तुतिः, द्वादशस्कन्धे मार्कण्डेयकृता भगवत्स्तुतिः, अतीव प्रसिद्धाः एताः स्तुतयः सन्ति। तथैव मार्कण्डेयपुराणे शक्रादिस्तुतिः अतीव प्रसिद्धा अस्ति। वर्तमानकाले यज्ञेषु शक्रादिस्तुतेः गानं भवति। पद्मपुराणे उत्तरखण्डे श्रीमृत्यञ्जयस्तोत्रम् अस्ति। तत्र शिवस्य शारिरीकं तथा आध्यात्मिकं स्वरूपं वर्णितम् अस्ति।

अनेन प्रकारेण पुराणेषु स्तोत्राणाम् आधिक्यम् अस्ति। नामस्तोत्राणि, कवचस्तोत्राणि, अष्टकानि तथा अन्यानि स्तोत्राणि पुराणेषु सन्ति। पुराणेषु एतावन्ति स्तोत्राणि सन्ति यत् वयं "पुराणानि स्तोत्रप्रधानानि सन्ति" इति वक्तुं शक्नुमः। पुराणस्तोत्रेषु यस्य स्तुतिः भवति तस्य

अतीव मनोहरं वर्णनं भवति। वैदिकस्तोत्रेषु एतत् न दृश्यते अतः पुराणकाले स्तोत्राणां पर्याप्तः विकासः अभवत् इति वक्तुं शक्नुमः।

**१.२.४ महाकाव्येषु स्तुतयः -**

वैदिककाले उत्पन्ना स्तुतिः रामायणे महाभारते पुराणेषु च क्रमेण विकसिता अभवत्। समयानन्तरं महाकाव्यानाम् उद्भवः अभवत्। तेषु अपि विविधरीत्या स्तुतयः कृताः सन्ति। महाकविः कालिदासः रघुवंशे विष्णोः स्तुतिं कुमारसम्भवे ब्रह्मणः च स्तुतिं वर्णितवान् अस्ति। तारकासुरात् त्रस्ताः देवाः द्वितीये सर्गे ब्रह्मणः स्तुतिं कुर्वन्ति। एतस्यां स्तुतौ विविधाः अलङ्काराः सन्ति। विरोधाभासस्य अलङ्कारस्य सुन्दरः श्लोकः यथा -

**"जगद्योनिरयोनिस्त्वं जगदन्तो निरन्तकः।**
**जगदादिरनादिस्त्वं जगदीशो निरीश्वरः।।"**[13]

किरातार्जुनीये महाकाव्ये अर्जुनः शिवस्य स्तुतिं करोति। तया प्रसन्नः शिवः अर्जुनाय पाशुपतास्त्रं ददाति। शिशुपालवधे महाकाव्ये भीष्मः श्रीकृष्णस्य स्तुतिं करोति। नैषधीयचरिते विष्णोः विविधानाम् अवताराणां स्तुतिः अस्ति। हरविजयमहाकाव्ये देवकृता चण्डिकास्तुतिः अस्ति। महाकाव्येषु याः स्तुतयः सन्ति तासु काव्यत्वम् अलङ्काराः च प्रचूरतया सन्ति। महाकवयः दार्शनिकदृष्ट्या स्तुतिमध्ये वर्णनं कृतवन्तः। काव्यार्थं प्रतिभायाः आवश्यकता भवति अतः महाकाव्यानां स्तुतिमध्ये अपि कवीनां प्रतिभादर्शनं भवति। रसयोग्याः शब्दाः तथा अलङ्काराः, गुणाः, कवेः निपुणता च, एतत् सर्वं मिलित्वा काव्यानां स्तुतिं सुन्दरीं सरसां च करोति। महाकाव्यस्य स्तुतिमध्ये एतेषां निरूपणेन स्तोत्रसाहित्यम् अलङ्कारयुक्तं रसयुक्तं च अभवत् इति वक्तुं शक्नुमः।

**१.२.५ स्वतन्त्रस्तोत्रकाराः तेषां स्तोत्राणि च -**

---

[13] कुमारसम्भवम् - २/९

वैदिकस्तुतिः लौकिकस्तुतिः इति द्विविधाः स्तुतयः अभवन्। वेदानां स्तुतयः प्राकृतिकदेवतानां कृते सन्ति। रामायणे पुनः लौकिकस्तोत्रस्य उद्भवः अभवत्। महाभारते वर्णनयुक्तानि स्तोत्राणि तथा नामस्तोत्राणि उद्धृतानि अथवा स्तोत्राणां परम्परा परिवर्तनं प्राप्तवती। पुराणेषु भक्तिप्रधानानि स्तोत्राणि सन्ति। स्तोत्रस्य विकासक्रमः महाकाव्यकाले अलङ्कृतः भावयुक्तः च अभवत्। वेदात् आरब्धा एषा परम्परा महाकाव्यपर्यन्तं पर्याप्तं विकासं प्राप्तवती। एतदनन्तरं केचन स्वतन्त्राः स्तोत्रकाराः अभवन्। ते स्वतन्त्राणि स्तोत्राणि रचितवन्तः। अत्र संक्षेपण स्वतन्त्रस्तोत्रकाराणां तेषां च स्तोत्राणां परिचयः प्रस्तूयते।

- महाकविः अश्वघोषः प्रसिद्धः बौद्धकविः अस्ति। तस्य बुद्धचरितं सौन्दरानन्दं च प्रसिद्धम् महाकाव्यम् अस्ति। अश्वघोषस्य नाम्ना स्रग्धराछन्दोयुक्ता गण्डीस्तोत्र-गाथा प्राप्यते। तत्र २९ श्लोकाः सन्ति तथा बौद्धधर्मस्य आध्यात्मिकं वर्णनम् अस्ति।
- अश्वघोषस्य अनुयायी मातृचेटः आसीत्। तस्य कालः ई.स. प्रथमं शतकम् अस्ति। सः बौद्धस्तोत्रयुक्तं ग्रन्थद्वयं रचितवान् यथा (१) चतुःशतकम् (२) अध्यर्द्धशतकम् इति। वर्तमानकाले तस्य ग्रन्थस्य अवशेषाः एव सन्ति।
- नागार्जुनः इति प्रसिद्धः बौद्धस्तोत्रकारः अभवत्। सः शून्यवादी तथा माध्यमिकशाखायाः आचार्यः आसीत्। तेन चत्वारः स्तवाः रचिताः (१) निरूपमस्तवः (२) लोकातीतस्तवः (३) परमार्थस्तवः (४) निरुत्तरस्तवः इति। एते चत्वारः उपलब्धाः सन्ति।
- महाकविः कालिदासः अतिप्रसिद्धः अस्ति। तस्य नाम्ना अम्बास्तवः, कालीस्तोत्रम्, गङ्गाष्टकम्, चण्डिकादण्डस्तोत्रम् इति स्तोत्राणाम् उल्लेखः अस्ति। एषः अन्यः कालिदासः भवितुं शक्यते।
- सिद्धसेनः दिवाकरः प्रसिद्धः जैनस्तोत्रकारः अस्ति। सः कल्याणमन्दिरस्तोत्रं रचितवान्। एतत् स्तोत्रं जैनेषु अतीव प्रसिद्धम् अस्ति। एतस्मिन् स्तोत्रे वसन्ततिलकाछन्दसि ४४ पद्यानि सन्ति।

- आचार्यः मानतुङ्गः अपि जैनस्तोत्रकारः अस्ति। सः बाणभट्टस्य समकालीनः आसीत्। तेन भक्तामरस्तोत्रं विरचितम्। तत्र ऋषभदेवस्य स्तुतिः अस्ति।
- महाकविः बाणभट्टः अतीव प्रसिद्धः अस्ति। बाणभट्टः चण्डिशतकं विरचितवान्। चण्डिशतके शतं श्लोकाः सन्ति। बाणभट्टस्य गद्यशैली अत्र पद्येषु अपि दृश्यते।
- मयूरकविः सूर्यशतकेन प्रसिद्धः अस्ति। कुष्ठरोगेण पीडितः सः कविः स्रग्धरा-छन्दसि शतश्लोकैः भगवतः सूर्यस्य स्तुतिं कृतवान्। फलतः तस्य रोगः नष्टः अभवत्।
- हर्षवर्धनः अपि बौद्धस्तोत्रकारः आसीत्। सः सुप्रभास्तोत्रं तथा अष्टमहाश्री-चैतन्यस्तोत्रं रचितवान्। तत्र बौद्धपरम्परानुसारं सर्वजनहिताय कामना कृता अस्ति।
- जगद्गुरुः आदिशङ्कराचार्यः स्तोत्रसाहित्ये अतीव प्रसिद्धः अस्ति। स्तोत्रसाहित्ये तस्य स्थानम् योगदानं च अतीव महत्त्वपूर्णम् अस्ति। तस्मिन् काले जैन-वादस्य, बौद्धवादस्य, निरीश्वरवादस्य, वेदविरोधिसम्प्रदायानां तथा अन्येषां विकृतसम्प्रदायानां प्रभुत्वम् आसीत्। तदा भगवान् आदिशङ्कराचार्यः विविधानां देवानां देवीनां च स्तोत्राणि रचितवान्। तेन विरचितानि स्तोत्राणि अध्यात्म-प्रधानानि, भावपूर्णानि, दार्शनिकानि च सन्ति। प्रायः द्विशतं स्तोत्राणि शङ्कराचार्येण रचितानि सन्ति। तस्य स्तोत्रेषु भक्तेः भावस्य तथा वेदान्त-ज्ञानस्य अद्भुतः समन्वयः अस्ति। सौन्दर्यलहरी, भवान्यष्टकं, देव्यपराध-क्षमापनस्तोत्रं, निर्वाणषटकं, शिवमानसपूजा, वेदसारशिवस्तवः, शिवपञ्चाक्षर-स्तोत्रं, कृष्णाष्टकं तथा विविधदेवानां प्रातःस्मरणस्तोत्राणि शङ्कराचार्येण रचितेषु प्रसिद्धानि सन्ति। प्रसिद्धस्तोत्राणां परिचये एतेषु केषाञ्चित् स्तोत्राणां परिचयं दास्यामि।
- ध्वन्यालोकस्य रचयिता आनन्दवर्धनाचार्यः बहुप्रसिद्धः अस्ति। तस्य देवीशतकम् अतिप्रसिद्धम् अस्ति। तत्र देव्याः पार्वत्याः स्तुतिः अस्ति। आलङ्कारिक-सौन्दर्यदृष्ट्या अपि अस्य शतकस्य महत्त्वपूर्ण स्थानम् अस्ति।
- आचार्यः उत्पलदेवः शैवः आसीत्। सः "शिवस्तोत्रावलीं" रचितवान्। भगवतः शिवस्य दार्शनिकं तथा आध्यात्मिकं वर्णनम् अत्र अस्ति। ग्रन्थे विंशतिः स्तोत्राणि सन्ति।

- वैष्णवसम्प्रदाये यामुनाचार्यः प्रसिद्धः अस्ति। सः "स्तोत्ररत्नम्" इति ग्रन्थं विरचितवान्। तस्मिन् ग्रन्थे ६५ पद्यानि सन्ति। विशिष्टाद्वैतवादस्य समर्थनेन सह भगवतः विष्णोः भक्तियुक्तं वर्णनम् अस्ति। इदं स्तोत्ररत्नं वैष्णवेषु प्रसिद्धम् अस्ति।
- वेंकटनाथः देशिकः दाक्षिणात्यः पण्डितः आसीत्। सः वैष्णवः आसीत्। तस्य वैष्णवस्तोत्राणि प्रायः ३० सन्ति। हयग्रीवस्तोत्रम्, दशावतारस्तोत्रम्, भगवद्व्यानसोपान म् इति प्रसिद्धानि स्तोत्राणि सः विरचितवान्।
- कविः जयदेवः प्रसिद्धः आलङ्कारिकः अस्ति। तस्य प्रसिद्धं गीतिकाव्यं गीतगोविन्दम् अस्ति। अस्य काव्यस्य रचना अर्धस्तोत्रात्मिका प्रतीयते। कृष्णस्य सुन्दरं सरसं च वर्णनम् अत्र अस्ति।
- चैतन्यः महाप्रभुः बङ्गदेशीयः आसीत्। एषः भक्तिमार्गे अतिप्रसिद्धः अस्ति। भागवताधारेण तेन शिक्षाष्टकम् तथा जगन्नाथाष्टकम् विरचितम् अस्ति।
- रूपगोस्वामी प्रसिद्धः वैष्णवः आसीत्। तेन मुकुन्दमुक्तावली विरचिता अस्ति। अत्र त्रिंशत् पद्यानि सन्ति। मधुरा शब्दावली तथा कृष्णस्य उत्कटा भक्तिः अत्र वर्णिता अस्ति।
- पुष्टिमार्गस्य प्रसिद्धः आचार्यः वल्लभाचार्यः अस्ति। वल्लभाचार्यस्य स्तोत्राणि अतीव प्रसिद्धानि सन्ति। यमुनाष्टकम्, मधुराष्टकम्, कृष्णाष्टकम्, श्रीनन्द-कुमाराष्टकम्, इति प्रसिद्धानि स्तोत्राणि श्रीवल्लभाचार्यः विरचितवान्।
- बुधकौशिकऋषेः रामरक्षास्तोत्रम् अतीव प्रसिद्धम् अस्ति।एका कथा अस्ति यत् स्वयं भगवान् शिवः बुधकौशिकमुनेः स्वप्ने रामरक्षास्तोत्रं कथितवान्। प्रातः उत्थाय मुनिः एतत् स्तोत्रं लिखितवान्। एतस्य स्तोत्रस्य प्रभावेण व्याधिः दुःखं सङ्कटं च नश्यति।

अनेन प्रकारेण अत्र केषाञ्चित् स्वतन्त्रस्तोत्रकाराणां तेषां स्तोत्राणां च नामोल्लेखसहितः संक्षिप्तः परिचयः प्रदतः। वेदे उद्भूतस्य स्तोत्रस्य कालक्रमे विकसितं स्वतन्त्रं स्वरूपम् अभवत्। वर्तमानकाले अनेकानि स्वतन्त्रस्तोत्राणि प्राप्यन्ते लिख्यन्ते च। अनेन प्रकारेण अत्र "स्तोत्रस्य उद्भवः विकासपरम्परा च" इति विषये यथाप्राप्तं यथामति प्रस्तुतम्।

**१.३ कानिचन प्रसिद्धानि स्तोत्राणि -**

प्रसिद्धस्तोत्रेषु भगवतः शङ्कराचार्यस्य स्तोत्राणि, वल्लभाचार्यस्य स्तोत्राणि, अन्यानि च स्तोत्राणि सन्ति। तेषां स्तोत्राणां समाजे अतीव प्रचारः प्रसारः च वर्तते। सामाजिकजनाः सामान्यतया एव तत् तत् स्तोत्रं भावपूर्वकं भक्तिपूर्वकं च पठन्ति तथा गायन्ति। अत्र तेषां केषाञ्चित् प्रसिद्धानां स्तोत्राणां संक्षेपेण परिचयं लिखामि। स्तोत्राणि देवविषयकानि भवन्ति अतः शिवस्तोत्राणि, विष्णुस्तोत्राणि, देवीस्तोत्राणि बहुप्रसिद्धानि सन्ति। अत्र विभागानुसारं तत्तद्देवस्य प्रसिद्धस्तोत्राणां परिचयं लिखामि।

**१.३.१ विष्णुस्तोत्राणि** -

प्रसिद्धस्तोत्राणां यदि गणनां कुर्मः तदा विष्णोः स्तोत्राणि अधिकानि स्युः। पुराणेषु विष्णुः मुख्यः देवः अस्ति अतः स्थाने स्थाने तस्य स्तोत्राणि सन्ति एव, अपितु स्वतन्त्रस्तोत्रपरम्परायाम् अपि विष्णोः स्तोत्राणि बहुप्रसिद्धानि सन्ति। पुराणादिषु यानि स्तोत्राणि सन्ति तेषां परिचयः तत्र प्रदत्तः अस्ति। अत्र केवलं प्रसिद्धानां केषांञ्चित् स्तोत्राणाम् एव परिचयं लिखामि।

**(१) अच्युताष्टकम् -**

“अच्युतं केशवं रामनारायणम्.....” इत्यादि अच्युताष्टकम् अतीव प्रसिद्धम् अस्ति। एतस्य रचयिता भगवान् आदिशङ्कराचार्यः अस्ति। अष्टकम् इति नाम्ना एव प्रतीयते यत् अस्मिन् अष्टश्लोकाः स्युः। भगवतः विष्णोः विविधानि नामानि अत्र कीर्तितानि सन्ति। नवमे श्लोके अस्य स्तोत्रस्य कीर्तनफलं कथितम् अस्ति।

**(२) विष्णुपादादिकेशान्तवर्णनम् -**

एतत् स्तोत्रं भगवान् आदिशङ्कराचार्यः विरचितवान् अस्ति। एतस्मिन् स्तोत्रे ५१ श्लोकाः सन्ति। अत्र भगवतः विष्णोः केशेभ्यः आरभ्यः चरणपर्यन्तं मनोहरं सुन्दरं च वर्णनम् अस्ति।

एतस्य स्तोत्रस्य पठनेन अन्तःकरणं विशुद्धं भवति इति फलश्रुतौ भगवता शङ्कराचार्येण लिखितम्। वैष्णवेषु इदं स्तोत्रं बहु प्रसिद्धम् अस्ति।

**(३) श्रीविष्णुमहिम्नःस्तोत्रम् -**

परमहंसः स्वामी ब्रह्मानन्दः एतस्य स्तोत्रस्य रचयिता अस्ति। एतस्मिन् स्तोत्रे ३५ पद्यानि सन्ति यत्र भगवतः विष्णोः दिव्यः महिमा वर्णितः अस्ति। विविधानां प्रसङ्गानाम् उल्लेखेन सह विष्णोः परमात्मनः माहात्म्यम् अत्र वर्णितम् अस्ति। इदं स्तोत्रं शिवमहिम्नःस्तोत्रात् प्रेरणां प्राप्य ब्रह्मानन्दस्वामिना विरचितम् अस्ति।

**(४) कमलापत्यष्टकम् -**

इदं स्तोत्रमपि ब्रह्मानन्दः स्वामी विरचितवान्। अस्य स्तोत्रस्य सर्वेषु श्लोकेषु अन्तिमा पङ्क्तिः अस्ति "भजत रे मनुजाः कमलापतिम्" अतः स्तोत्रस्य नाम कमलापत्यष्टकम् अभवत्। अस्मिन् स्तोत्रे नव पद्यानि सन्ति। कमलापतिः विष्णुः एव सर्वदा सर्वथा च भजनीयः इति अस्य स्तोत्रस्य तात्पर्यम् अस्ति।

**(५) श्रीदशावतारस्तोत्रम् -**

भगवतः विष्णोः दशावताराणां वर्णनयुक्तम् इदं स्तोत्रं महाकविः जयदेवः विरचितवान् अस्ति। एतस्मिन् स्तोत्रे ११ पद्यानि गीतिमयानि तथा पदावल्या रमणीयानि सन्ति। मत्स्य-कूर्म-वराह-नृसिंह-वामन-परशुराम-राम-बलराम-बुद्ध-कल्कि-अवताराणां स्तवनम् अत्र अस्ति। कृष्णस्य उल्लेखः नास्ति अतः वक्तुं शक्यते यत् जयदेवः श्रीकृष्णम् अवताररूपेण न गणयति।

**(६) श्रीकृष्णाष्टकम् -**

"भजे व्रजैकमण्डनं समस्तपापखण्डनम्....." इत्यादि अष्टश्लोकैः युक्तं श्रीकृष्णाष्ट-कम् अतिप्रसिद्धम् अस्ति। एतस्य रचयिता भगवान् आदिशङ्कराचार्यः अस्ति। अनुप्रासालङ्कारस्य

आधिक्येन युक्तम् इदं स्तोत्रं यः पठति सः जन्मनि जन्मनि श्रीकृष्णे भक्तिमान् भवति इति फलश्रुतौ लिखितम् अस्ति।

**(७) गोविन्ददामोदरस्तोत्रम् -**

"गोविन्द दामोदर माधवेति" इति पद्यांशेन अतिप्रसिद्धम् अस्ति गोविन्ददामोदरस्तोत्रम्। एतस्य स्तोत्रस्य रचयिता श्रीबिल्वमङ्गलाचार्यः अस्ति। अस्मिन् स्तोत्रे ७१ पद्यानि तथा सर्वेषां श्लोकानाम् अन्ते "गोविन्द दामोदर माधवेति" इति प्रयोगः अस्ति अतः स्तोत्रस्य नाम गोविन्ददामोदरस्तोत्रम् अभवत्।

**(८) मधुराष्टकम् -**

श्रीमद्-वल्लभाचार्येण विरचितम् इदं मधुराष्टकं वैष्णवसम्प्रदाये अत्यन्तं प्रसिद्धम् अस्ति। मधुराधिपतेः भगवतः श्रीकृष्णस्य सर्वमपि मधुरम् अस्ति इति आचार्येण अष्टभिः श्लोकैः अत्र सुन्दरपदावल्या वर्णितम् अस्ति।

**(९) रामरक्षास्तोत्रम् -**

भगवतः श्रारामचन्द्रस्य इदं रक्षास्तोत्रं बहु प्रसिद्धम् अस्ति। अस्य स्तोत्रस्य रचयिता बुधकौशिकः मुनिः अस्ति। दन्तकथानुसारं श्रूयते यत् भगवान् शिवः मुनेः बुधकौशिकस्य स्वप्ने आगत्य इदं स्तोत्रं कथितवान्। प्रातः उत्थाय मुनिना तत् लिखितम्। इदमेव रामरक्षास्तोत्रम् उच्यते। अस्मिन् स्तोत्रे ३८ श्लोकाः सन्ति। अस्य स्तोत्रस्य बहवः श्लोकाः प्रसिद्धाः सन्ति यथा "रामो राजमणिः....." इत्यादि विभक्तिश्लोकः, "राम रामेति रामेति" इति वा।

**१.३.२ शिवस्तोत्राणि -**

शिवः सद्यः प्रसीदति अतः शिवस्य स्तोत्राणि अपि अनेकानि उपलभ्यन्ते। शिवस्य स्तोत्राणां बाहुल्यं शङ्कराचार्येण रचितेषु स्तोत्रेषु अस्ति। तदतिरिच्य रावणकृतं शिवताण्डवस्तोत्रं

तथा पुष्पदन्तविरचितं शिवमहिम्नःस्तोत्रमपि अतिप्रसिद्धं वर्तते। अत्र शिवस्य स्तोत्रेषु प्रसिद्धानां स्तोत्राणां परिचयं लिखामि।

**(१) शिवताण्डवस्तोत्रम्** -

प्रकाण्डपण्डितेन असुरराज-रावणेन भगवतः शिवस्य प्रसन्नतार्थम् इदं स्तोत्रं विरचितम्। अस्मिन् स्तोत्रे १५ पद्यानि सन्ति। उद्धतपदानां प्रयोगेण ताण्डवस्तोत्रं सत्यमेव पदानां ताण्डवं प्रतिभाति। रावणः शिवभक्तः आसीत् अतः सः इदं स्तोत्रं रचितवान्। शिवः यदा ताण्डवं करोति तदा तस्य स्वरूपं कीदृशं भवति इति अस्मिन् स्तोत्रे रावणेन प्रतिपादितम् अस्ति।

**(२) शिवमानसपूजा** -

भगवान् आदिशङ्कराचार्यः अस्य सेतोत्रस्य रचयिता अस्ति। एतस्मिन् स्तोत्रे भगवतः शिवस्य मानसिकी पूजा वर्णिता अस्ति। मानसकल्पितान् पदार्थान् शिवाय समर्पयति भावकः। अन्ते वदति यत् शिवः आत्मा, मतिः पार्वती, भूतगणाः प्राणाः, शरीरं मन्दिरं, विषयभोगः पूजा, निद्रा समाधिः, चलनं परिक्रमा, वाक्यानि स्तोत्राणि तथा सर्वविधं कर्म शिवस्य आराधनम् अस्ति। इत्थं मानसिकी पूजा वर्णिता अस्ति अस्मिन् स्तोत्रे।

**(३) वेदसारशिवस्तवः -**

शङ्कराचार्यविरचिते अस्मिन् स्तवने ११ पद्यानि सन्ति। शिवः सर्ववेदानां साररूपः अस्ति इति अस्मिन् स्तवने प्रतिपादितम्। दार्शनिकसिद्धान्तानां निरूपणेन सह सर्वमपि शिवमयं विद्यते इति भगवान् शङ्कराचार्यः अत्र वर्णितवान्।

**(४) शिवपञ्चाक्षरस्तोत्रम् -**

इदमपि शङ्कराचार्यविरचितम् अस्ति। एतस्मिन् स्तोत्रे प्रतिपद्यं क्रमेण न-म-शि-वा-य-वर्णानां नमस्कारेण सह ग्रन्थनम् अस्ति अतः इदं पञ्चाक्षरस्तोत्रम् उच्यते। इदमपि अतिप्रसिद्धम् अस्ति।

**(५) रुद्राष्टकम् -**

एतत् स्तोत्रं गोस्वामी तुलसीदासः रचितवान्। अत्र ८ पद्यानि सन्ति तथा नवमे पद्ये फलश्रुतिः अस्ति। भगवतः शिवस्य दार्शनिकं स्वरूपं तथा शारीरिकं वर्णनम् अपि अत्र अस्ति।

**(६) जयशङ्करस्तोत्रम् -**

भक्तः उपमन्युः सरसपदावल्या शिवस्य स्तुतिं कृतवान् सा जयशङ्करस्तोत्रम् इति नाम्ना प्रसिद्धा अस्ति। शिवस्य प्रसन्नतायै यमात् रक्षायै च उपमन्युः इदं स्तोत्रं कृतवान्। अस्मिन् स्तोत्रे २० पद्यानि सन्ति। करूणामयः उपमन्युः करूणाकरं शिवं स्तौति। शिवः मां कृपणं न पश्यति अतः किं करोमि ? रोदिमि वा रटनं करोमि ? इति भावपूर्णं स्तोत्रम् उपमन्युः कृतवान्।

**(७) निर्वाणषटकम् -**

षटकम् अर्थात् षट् श्लोकयुक्तं स्तोत्रम्। एतत् निर्वाणषटकं भगवान् शङ्कराचार्यः रचितवान् अस्ति। "अहं केवलं चिदानन्दरूपः शिवः अस्मि, अन्यत् सर्वं विकृतियुक्तम्, अहं शिवस्वरूपः" इति उदात्तभावनायुक्तं दार्शनिकम् एतत् स्तोत्रम् अस्ति। प्रतिश्लोकं दार्शनिकतत्त्वानां गूढं निरूपणम् अत्र अस्ति।

**(८) शिवमहिम्नःस्तोत्रम् -**

गन्धर्वराजः पुष्पदन्तः अस्य स्तोत्रस्य रचयिता अस्ति। स्वकीयमहिम्नः भ्रष्टः पुष्पदन्तः भगवतः शिवस्य स्तुतिं करोति। शिखरिणीच्छन्दसि निबद्धम् इदं स्तोत्रं भावप्रधानम् अस्त्येव, तेन सह अत्र दार्शनिकसिद्धान्तानामपि स्थाने स्थाने नियोगः वर्तते। अस्मिन् स्तोत्रे कति श्लोकाः सन्ति इति विषये मतान्तरम् अस्ति। सम्प्रति शिवमहिम्नःस्तोत्रे ४० पद्यानि प्राप्यन्ते किन्तु १६ शताब्द्यां मधुसुदनसरस्वती-महोदयेन ३२ पद्यानां टीका विरचिता। नर्मदेश्वरमहादेवस्य मन्दिरे अपि ३१ पद्यानि एव भित्तिकासु लिखितानि सन्ति। अतः प्रायः ३१ वा ३२ पद्यानि अस्मिन् स्तोत्रे स्युः इति अनुमीयते।

**१.३.३ देवीस्तोत्राणि -**

अन्यदेवानाम् इव देव्याः अपि प्रसिद्धानि कानिचन स्तोत्राणि सन्ति। मातृरूपेण संस्थिता देवी भक्तैः भावपूर्णपद्यैः स्तुता वर्तते। अत्र केषाञ्चित् देवीस्तोत्राणां परिचयः लिख्यते।

**(१) देव्यपराधक्षमापनस्तोत्रम् -**

''कुपुत्रो जायेत् क्वचिदपि कुमाता न भवति'' इति पङ्क्त्या प्रसिद्धम् एतत् स्तोत्रं शङ्कराचार्येण विरचितमस्ति। एतस्मिन् स्तोत्रे द्वादश पद्यानि सन्ति। करूणापूर्णैः पद्यैः अत्र देव्याः क्षमायाचना कृता वर्तते।

**(२) भवान्यष्टकम् -**

''गतिस्त्वं गतिस्त्वं त्वमेका भवानि!'' इत्यनया पङ्क्त्या प्रसिद्धं भवान्यष्टकं भगवान् शङ्कराचार्यः रचितवान् अस्ति। जीवः किमपि न जानाति, तस्य कृते संसारे कोऽपि सम्बन्धः नास्ति, विविधं कर्म करोति तथापि किमपि न जानाति, दोषान् करोति, अतः देवीं प्रति जीवः वदति यत् त्वम् एका एव गतिः असि, त्वया विना किमपि नास्ति इति भावः अस्ति।

**(३) कनकस्तवः (लक्ष्मीस्तवः) -**

भगवान् शङ्कराचार्यः एतत् स्तोत्रं रचितवान्। एतस्मिन् स्तोत्रे १६ पद्यानि सन्ति। भगवत्याः लक्ष्म्याः अत्र सुन्दरं वर्णनम् अस्ति। एतस्य स्तोत्रस्य गानेन भगवती लक्ष्मीः प्रसन्ना भवति तथा ऐश्वर्यं प्रयच्छति इति फलश्रुतौ कथितमस्ति।

**(४) अन्नपूर्णास्तोत्रम् -**

"भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी" इति पद्यभागेन अतिप्रसिद्धमिदं स्तोत्रम् अस्ति। देव्याः अन्नपूर्णास्वरूपायाः अत्र स्तुतिः अस्ति। एतत् स्तोत्रं शङ्करा-चार्यनिर्मितम् अस्ति तथा अत्र द्वादश श्लोकाः सन्ति।

**(५) अम्बाष्टकम् -**

अत्यन्तम् उद्धतपदैः समासैः च विरचितम् इदं स्तोत्रं शङ्कराचार्यस्य रचना अस्ति। अत्र अष्ट पद्यानि अश्वधाटीछन्दसि निबद्धानि सन्ति। एतस्य स्तोत्रस्य अर्थावगमाय अतीव पाण्डित्यम् आवश्यकम्।

**१.३.४ अन्यानि स्तोत्राणि -**

स्तोत्रेषु अधिकानि स्तोत्राणि प्रायः विष्णोः, शिवस्य, देव्याः च स्युः। तेषु अपि अतीव प्रसिद्धानां स्तोत्राणां परिचयः संक्षेपेण अत्र प्रदत्तः अस्ति। तदतिरिच्य अन्येषां देवानामपि कानिचन प्रसिद्धानि स्तोत्राणि सन्ति। तेषां परिचयः अत्र प्रदीयते।

**(१) गुर्वष्टकम् -**

"गुरोरङ्घ्रिपद्मे मनश्चेन्न लग्नं ततः किं ततः किं ततः किं ततः किम्" इति पद्यांशेन सुप्रसिद्धं गुर्वष्टकम् आदिशङ्कराचार्येण विरचितम् अस्ति। अष्ट-श्लोकेषु "गुरोरङ्घ्रिपद्मे" इति पङ्क्तिः अस्ति। अतः गुर्वष्टकम् इति नाम अस्ति। फलश्रुतेः अन्तिमः नवमः श्लोकः अस्ति। गुरौ निष्ठा सदैव भवेत् इति अस्य स्तोत्रस्य सारः अस्ति। सर्वविद्याः पठिताः किन्तु गुरौ निष्ठा न भवति तावत् पर्यन्तं विद्यायाः कोऽपि लाभः नास्ति इति शङ्कराचार्यः लिखितवान्।

**(२) चर्पटपञ्जरिकास्तोत्रम् -**

अस्य स्तोत्रस्य रचयिता भगवान् शङ्कराचार्यः वर्तते। स्तोत्रेऽस्मिन् १७ पद्यानि सन्ति। "भज गोविन्दं भज गोविन्दं भज गोविन्दं मूढमते। प्राप्ते सन्निहिते मरणे नहि नहि रक्षति डुकृञ् करणे।।" इति ध्रुवपदेन अतीव प्रसिद्धम् एतत् स्तोत्रं भक्तियुक्तं दार्शनिकं च अस्ति। संसारे सर्वम् अपि असारभूतम् अस्ति। केवलं भगवान् एव शाश्वतः अविनाशी अस्ति अतः तस्य नामसङ्कीर्तनमेव करणीयम् इति अस्य स्तोत्रस्य सारः अस्ति।

**(३) गङ्गाष्टकम् -**

गङ्गाष्टकम् इति नाम्ना एकं महर्षिवाल्मीकिविरचितं तथा द्वितीयं शङ्कराचार्यविरचितम् इति द्वे गङ्गाष्टके स्तः। भगवत्याः गङ्गायाः पावनत्वं माहात्म्यं च स्तोतुं द्वयोः स्तोत्रयोः रचना कृता अस्ति। वाल्मीकिविरचिते स्तोत्रे अष्ट श्लोकाः तथा फलश्रुतिः तथा शङ्कराचार्यविरचिते अष्ट श्लोकाः, द्वयोः श्लोकयोः च फलश्रुतिः अस्ति। तदतिरीच्य चतुर्दशश्लोकात्मकं गङ्गास्तोत्रम् अपि प्रसिद्धम् अस्ति। तस्य रचयिता अपि शङ्कराचार्यः अस्ति।

**(४) नर्मदाष्टकम् -**

"त्वदीयपादपङ्कजं नमामि देवि नर्मदे!" इति पङ्क्त्या अत्यन्तं प्रसिद्धम् एतत् स्तोत्रम् आदिशङ्कराचार्यः रचितवान्। एतस्मिन् स्तोत्रे भगवत्याः नर्मदायाः माहात्म्यं वैभवं प्रभावं च शङ्कराचार्यः वर्णितवान् अस्ति। नर्मदाष्टकस्य पठनेन नर्कदर्शनं न भवति इति फलश्रुतौ लिखितम् अस्ति।

अनेन प्रकारेण अत्र केषाञ्चित् एव अतिप्रसिद्धानां स्तोत्राणां परिचयः लिखितः। एतानि स्तोत्राणि विहाय अन्यानि अपि प्रसिद्धानि स्तोत्राणि सन्ति किन्तु बहुप्रसिद्धानाम् एव परिचयः प्रस्तुतः।

**१.४ स्तोत्रसाहित्ये शिवमहिम्नःस्तोत्रस्य स्थानम् -**

शिवमहिम्नःस्तोत्रं गन्धर्वराज-पुष्पदन्तेन विरचितम् अस्ति। शिवनिर्माल्यस्य उल्लङ्घनेन सः स्वप्रभावात् भ्रष्टः अभवत् अतः सः भगवतः शिवस्य स्तुतिं कृतवान् इति एकेन श्लोकेन ज्ञायते-

**"कुसुमदशननामा सर्वगन्धर्वराजः**
**शिशुशशिधरमौलेर्देवदेवस्य दासः।**
**स खलु निजमहिम्नो भ्रष्ट एवास्य रोषात्**
**स्तवनमिदकार्षीद्दिव्यदिव्यं महिम्नः।।"[14]**

एतत् स्तोत्रं पुष्पदन्तस्य दीनावस्थायां भावगर्भितवाक्यैः अन्तःकरणेन निर्गतम् अस्ति। पुष्पदन्तः शिवस्य स्तोत्रकरणे स्वस्य असामर्थ्य प्रदशयति। "अनेन स्तोत्रेण केवलं वाणीं पवित्रां करोमि" इति भावः तस्य मनसि अस्ति -

---

[14] शि.म.३७

**"मम त्वेतां वाणीं गुणकथनपुण्येन भवतः।**

**पुनामीत्यर्थेऽस्मिन् पुरमथन! बुद्धिर्व्यवसिता।।"**[15]

पुष्पदन्तः आत्मनः दीनभावं प्रकटीकरोति अतः एव अस्मिन् स्तोत्रे विविधानां शास्त्राणामपि उल्लेखः दृश्यते। भगवान् शङ्करः सर्वविद्यानां स्वामी अस्ति अतः पुष्पदन्तः विविधशास्त्राणां दृष्टान्तं पुरस्कृत्य शिवस्य स्तुतिं करोति। अनेन कारणेन एतस्य स्तोत्रस्य यथार्थं ज्ञानं प्राप्तुं सर्वशास्त्रेषु प्रवेशः नैपुण्यं च आवश्यकम् अस्ति। दर्शनानां वेदवेदाङ्गानां मार्गाः विविधाः भवन्तु नाम, सर्वैः लक्ष्यरूपेण तु शिवः एव लभ्यः अस्ति, यथा नदीनां प्रवाहः भिन्न-भिन्नमार्गेण समुद्रं प्रति एव गच्छति।

**"त्रयी साङ्ख्यं योगः पशुपतिमतं वैष्णवमिति**

**प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च।**

**रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषां**

**नृणामेको गम्यस्त्वमसि पयसामर्णव इव।।"**[16]

सामान्यदृष्ट्या कस्यापि विकारः श्लाघनीयः प्रशंसायोग्यः न भवति किन्तु भगवतः शिवस्य विकारस्तु सर्वथा प्रशंसनीयः एव भवति। सामान्यानां द्वे नेत्रे भवतः किन्तु शिवः त्रिनयनः अस्ति सः विकारः अपि स्तुतियोग्यः एव अस्ति। शिवस्य कण्ठे विषस्य यत् चिह्नम् अस्ति तत् तु भगवतः शिवस्य शोभाम् अभिवर्धते। अतः उक्तम्-

**"अकाण्डब्रह्माण्डक्षयचकितदेवासुरकृपा-**

**विधेयस्यासीद् यस्त्रिनयन विषं संहृतवतः।**

---

[15] तत्रैव-०३

[16] तत्रैव-०७

**स कल्माषः कण्ठे तव न कुरुते न श्रियमहो**

**विकारोऽपि श्लाघ्यो भुवनभयभङ्गव्यसनिनः।।"**[17]

अलङ्कारदृष्ट्या अपि एतत् स्तोत्रम् अतीव मनोहरं विद्यते। अत्र अर्थान्तरन्यासः, उपमा, अनुप्रासः इत्यादयः अलङ्काराः एतत् स्तोत्रम् इतोऽपि रमणीयं सरसं च कुर्वन्ति। उपमाऽलङ्कारः यथा

- उपमाऽलङ्कारः = "नृणामेको गम्यस्त्वमसि पयसामर्णव इव"[18]
- अनुप्रासः = "अकाण्डब्रह्माण्ड"[19]
- अनुप्रासः= "भुवनभयभङ्गाव्यवसानिनः"[20]
- अर्थान्तरन्यासः = "न हि वशिषु पथ्यः परिभवः"[21]
- अर्थान्तरन्यासः = "न खलु परतन्त्राः प्रभुधियः"[22]
- रूपकम् = "निजमुदहरन्नेत्रकमलम्"[23]

इत्थम् अलङ्कारैः अलङ्कृतम् इदं स्तोत्रम् अस्ति। रूपकस्य अतिरमणीयम् उदाहरणम्-

**"रथः क्षोणी यन्ता शतधृतिरगेन्द्रो धनुरथो**

**रथाङ्गे चन्द्रार्कौ रथचरणपाणिः शर इति।**

**दिधक्षोस्ते कोऽयं त्रिपुरतृणमाडम्बरविधि-**

**र्विधेयैः क्रीडन्त्यो न खलु परतन्त्राः प्रभुधियः।।"**[24]

---

[17] तत्रैव-१४

[18] तत्रैव-०७

[19] तत्रैव-१४

[20] तत्रैव-१४

[21] तत्रैव-१५

[22] तत्रैव-१८

[23] तत्रैव-१९

[24] तत्रैव-१८

वेदवेदाङ्गदर्शनादिभिः शास्त्रैः सह अत्र पौराणिकानां कथानामपि सुन्दरः विनियोगः अस्ति। ब्रह्मा तथा विष्णुः शिवस्य ऐश्वर्यं ज्ञातुं वह्निस्तम्भस्य उपरि अधश्च गतवन्तौ किन्तु शिवस्य ऐश्वर्यं न ज्ञातम्। अतः ब्रह्मा तथा विष्णुः अपि शिवस्य स्तुतिं कृतवन्तौ। तेन शिवः प्रसन्नः भूत्वा स्वयमेव दर्शनं दत्तवान्।[25] रावणः एकवारं स्वस्य पराक्रमं दर्शयितुं कैलाशपर्वतम् उत्खातुं प्रयत्नं कृतवान् तदा भगवान् शिवः स्वस्य पादाङ्गुष्ठेन एव पर्वतं नोदितवान्। तेन रावणः पीडितः तथा क्षमायाचनापूर्वकं शिवस्य स्तुतिं कृतवान्।[26] बाणासुरस्य कथा,[27] समुद्रमन्थनस्य कथा,[28] कामदेवस्य दहन-प्रसङ्गः,[29] त्रिपुरदाहप्रसङ्गः,[30] दक्षस्य यज्ञविध्वंसप्रसङ्गः,[31] विष्णोः सहस्रकमल-पूजनस्य प्रसङ्गः,[32] इत्यादिभिः अनेकैः पौराणिकैः प्रसङ्गौः एतत् स्तोत्रं समलङ्कृतम् अस्ति।

स्तोत्रेऽस्मिन् विविधानां शास्त्राणां समाहारः, विविधानाम् अलङ्काराणां सुन्दरः विन्यासः तथा अनेकानां पौराणिककथानां विनियोगः अस्ति। एतत् सर्वम् एकस्मिन् स्थाने दुर्लभम् अस्ति किन्तु अस्मिन् स्तोत्रे प्राप्यते। तेन एव अस्य स्तोत्रस्य स्थानं स्तोत्रसाहित्ये अतीव उत्कृष्टं भवति। अस्य स्तोत्रस्य अनेकाः टीकाः अपि सन्ति। तासु प्रसिद्धा टीका मधुसूदनाचार्यस्य अस्ति। अन्याः अपि प्रकाशिताः अप्रकाशिताश्च टीकाः स्युः। तिस्रः अप्रकाशिताः टीकाः तु मम समीपे सन्ति। तासु एकस्याः उपरि संशोधनम् अस्मिन् लघुशोधनिबन्धे क्रियते। टीकाभिः अपि ज्ञायते यत् इदं शिवमहिम्नःस्तोत्रम् अतीव प्रसिद्धं महत्त्वपूर्णं च अस्ति तथा स्तोत्रसाहित्ये अस्य स्तोत्रस्य विशिष्टं स्थानम् अस्ति इति।

---

25 तत्रैव-१०

26 तत्रैव-११,१२

27 तत्रैव-१३

28 तत्रैव-१४

29 तत्रैव-१५

30 तत्रैव-१८

31 तत्रैव-२१

32 तत्रैव-१९

## द्वितीयं प्रकरणम् - "पाठसम्पादनस्य पद्धतिः"

एतस्याः "अज्ञातकर्तृकायाः शिवमहिम्नःस्तोत्रटीकायाः" प्राप्ता मातृका देवनागरीलिप्यां लिखिता अस्ति अतः तस्याः पठने विशेषतया किमपि कष्टं न अनुभूयते। प्रायः सर्वाण्यपि अक्षराणि स्पष्टतया परिचितानि भवन्ति। लिपिकारः कुत्रचित् अशुद्धिं कृतवान् स्यात् इति दृश्यते। अशुद्धिषु प्रायः एतादृश्यः अशुद्धयः सन्ति यथा -

- "ब" कारस्य स्थाने "व" कारः।

  यथा- "ब्रह्मादीनाम्" इत्यस्य स्थाने "व्रह्मादीनाम्"(म.स्तो.टी.श्लो.१) इति लिखितम्।
- कुत्रचित् "व" कारस्य स्थाने "ब" कारः।

  यथा- "इति वाक्यार्थः" इत्यस्य स्थाने "इति बाक्यार्थः"(म.स्तो.टी.श्लो.१) इति लिखितम्।
- स्वतन्त्रः "य" कारः "य" एव लिखितः किन्तु "य" कारः यत्र अर्धाक्षरसंयुक्तः अस्ति तत्र "प" कारः लिखितः अस्ति।

  यथा- "अथावाच्यः" इति स्थाने "अथावाच्पः"(म.स्तो.टी.१), "स्वस्य" इति स्थाने "स्वस्प"(म.स्तो.टी.१) इति लिखितम्। एतादृशम् अस्यां मातृकायां सर्वत्र अस्ति।
- "श"कारस्य स्थाने "स"कारः।

  यथा- "सावकाशत्वम्" इत्यस्य स्थाने "सावकासत्वम्" (म.स्तो.टी.श्लो.१) इति लिखितम्।
- अस्थाने "अवग्रहः"।

  यथा- "पततिऽपि" इति लिखितम्। (म.स्तो.टी.श्लो.२)
- "क्र" इत्यस्य स्थाने "क" लिखितम्।

  यथा- "व्याक्रोशीम्" इत्यस्य स्थाने "व्याकोशीम्" इति लिखितम्।(म.स्तो.टी.श्लो.४)
- मसिप्रसरणकारणात् "म्" स्थाने "भ्" दृश्यते।

  यथा- "स्तोतुम्" इत्यस्य स्थाने "स्तोतुभ्" इति लिखितम्। (म.स्तो.टी.श्लो.२)

- मसिप्रसरणकारणात् “भ”कारस्य स्थाने “त”कारः दृश्यते।

  यथा- “भवविधिः” इत्यस्य स्थाने “तवविधिः” इति लिखितम्। (म.स्तो.टी.श्लो.६)

- कुत्रचित् मातृकायां पङ्क्तेः उपरि व्याख्यातपदस्यापि व्याख्या कृता दृश्यते। यथा- “त्रयाणां वेदानां समाहारस्त्रयी एको मार्गः” तस्य उपरि “वेदविहितो मार्गः” इति व्याख्यानम्। (म.स्तो.टी.श्लो.७)

- लिपिकः किमपि पदं विस्मरति लेखितुं, तत् पदम् ˇ‸ इति चिह्नं कृत्वा संयोजितम् अस्ति। यथा- “योगशास्त्रम् ˇ‸” इत्यस्य उपरि “वैशेषिकशास्त्रं सांख्यं” इति लिखितम्। (म.स्तो.टी.७)

- अस्यां मातृकायाम् अनुस्वारस्य परसवर्णः सन्धिः कृतः नास्ति। मया अनुस्वारस्य स्थाने “म्”कारः कृतः अस्ति।

- “क”कारस्य स्थाने कुत्रचित् “ग”कारः अस्ति।

  यथा- “प्रगटयन्”। (म.स्तो.टी.४)

- ह्रस्व उकारस्य स्थाने क्वचित् दीर्घः ऊकारः अस्ति।

  यथा- “रूद्ररूपेण”। (म.स्तो.टी.५)

- ठकारस्य स्थाने टकारः कृतः।

  य़था- “अधिष्टातारम्”। (म.स्तो.टी.६)

- कुत्रचित् “आ” इत्यस्य स्थाने अवग्रहं कृत्वा । योजितः अस्ति। यथा- “चित्तेऽ।त्मनि” = “चित्ते आत्मनि” इति।

- मातृकायां “पुनः२” इति लिखितं तस्य स्थाने मया “पुनः पुनः” इति लिखितम्।

- उपरि निर्दिष्टं तथा मया मातृकायाः पाठसम्पादनं कृतम् अस्ति। यत्र अशुद्धयः सन्तिः तत्र परिष्करः अपि उपरि निर्दिष्टानुसारं कृतः अस्ति।

अस्य ग्रन्थस्य एका एव पाण्डुलिपिः प्राप्ता अतः कः पाठः शुद्धः इति प्रश्नः एव नास्ति। अतः व्याकरणानुसारं तथा प्रसिद्धनियमानुसारं पाठसम्पादनं कृतम् अस्ति। पाठसम्पादनस्य

कृते या पद्धतिः मया अनुसृता सा प्रो.वसन्तकुमार-भट्ट-महोदयस्य "संस्कृत पाण्डुलिपिओ अने समीक्षित पाठसम्पादनविज्ञान" इति ग्रन्थे दर्शिता अस्ति। (संस्कृत पाण्डुलिपिओ अने समीक्षित पाठसम्पादनविज्ञान, प्रो. वसन्तकुमार म. भट्ट, सरस्वती पुस्तक भण्डार, अहमदाबाद, २००९-२०१०, पृ.१३२-१३३)

- एषा मातृका एका एव प्राप्ता अतः पाठान्तराणाम् अवकाशः नास्ति।
- यत्र दोषयुक्तः पाठः शब्दः वर्णः वा अस्ति तत्र शुद्धः पाठः शब्दः वर्णः वा ( ) चिह्ने सूचितः अस्ति।
- यत्र सन्दिगधः पाठः अस्ति तत्र {} एतादृशे चिह्ने ? चिह्नेन सहितः पाठः सूचितः अस्ति।

एतत् विहाय अन्यसङ्केतानाम् आवश्यकता अत्र न जाता यतोहि उपरि सूचितयोः द्वयोः एव पाठशुद्धिः भवितुं शक्नोति।

एवम् अत्र महिम्नःस्तोत्रस्य अज्ञातमातृकायाः टीकायाः पाठसम्पादनं प्रसिद्धपद्धतिम् अनुसृत्य कृतम् अस्ति।

## तृतीयं प्रकरणम् -

## “अज्ञातकर्तृकायाः शिवमहिम्नःस्तोत्रटीकायाः मातृकायाः परिचयः”

मातृका अर्थात् हस्तलिखितः ग्रन्थः। प्रायः पुरातनग्रन्थाः मातृकारूपेण प्राप्ताः भवन्ति। ग्रन्थस्य कर्ता प्रथमं ग्रन्थं लिखति तदनन्तरं तस्य ग्रन्थस्य प्रतिलिपिः भवति। एतेन कारणेन एकस्य ग्रन्थस्य अनेकाः प्रतिलिपयः भवन्ति। केचन ग्रन्थाः विविधासु लिपिषु लिखिताः भवन्ति। लेखनार्थम् अपि पर्णानां, कर्गदानां च उपयोगः भवति। कर्गदानां विविधा आकृतिः भवति। अतः मातृकायाः परिचयः दातव्यः यत् मातृका कुतः प्राप्ता ? तस्याः आकृतिः का ? अत्र प्राप्तायाः मातृकायाः परिचयं ददामि।

### ३.१ मातृकायाः प्राप्तिस्थानम् -

शिवमहिम्नःस्तोत्रम् अतीव प्रसिद्धम् अस्ति। अतः तस्य अनेकाः टीकाः अपि स्युः। आचार्यश्रीकैलाससागरसूरिज्ञानमन्दिर-कोबा-गान्धिनगरतः अहं तिस्रः टीकाः प्राप्तवती। तासु एकां अज्ञातकर्तृकां टीकां संशोधनार्थम् अहं स्वीकृतवती। एषा मातृका कोबास्थिते सङ्ग्रहालये अस्ति इति सूचना प्रो.वसन्तकुमार-भट्ट महोदयेन प्रदत्ता। एतस्याः मातृकायाः समीक्षितं पाठ-सम्पादनम् अस्मिन् शोधनिबन्धे करिष्यामि।

### ३.२ मातृकायाः कर्ता -

एषा टीका अज्ञातकर्तृका अस्ति। यतोहि टीकायाः अन्ते पुष्पिकायां कर्तुः विषये किमपि लिखितं नास्ति। अतः कर्तुः विषये किमपि न ज्ञायते।

### ३.३ मातृकायाः कालः -

एषा टीका कर्गजे लिखिता अस्ति। टीकायाः लिपिः देवनागरी अस्ति। अतः देवनागरी लिपेः प्रचारात् अनन्तरम् एषा टीका लिखिता स्यात्। टीकाकर्तुः तथा लिपिकस्य विषये किमपि लिखितं नास्ति अतः अस्याः कालं ज्ञातुं वयम् असमर्थाः स्मः।

**३.४ मातृकायाः कलेवरम् -**

अस्याः मातृकायाः कलेवरम् १०½ × ५ अस्ति। मातृकायाः पञ्जीकरणसङ्ख्या २७४८१ अस्ति। मातृकायाः लेखनं द्विविधम् अस्ति - टीकालेखनं, स्तोत्रलेखनं च। प्रतिपृष्ठम् उपरि टीकालेखनं, मध्ये स्तोत्रस्य पद्यलेखनम्, अधः च टीकालेखनं कृतम् अस्ति। उपरि यत् टीकालेखनं कृतम् अस्ति तत्र कुत्रचित् षट् पङ्क्तयः, कुत्रचित् सप्त पङ्क्तयः सन्ति। मध्ये स्तोत्रस्य मूलपद्यानां लेखने कुत्रचित् पञ्च पङ्क्तयः, कुत्रचित् चतस्रः पङ्क्तयः सन्ति। अधः टीकालेखने कुत्रचित् चतस्रः पङ्क्तयः, कुत्रचित् पञ्च पङ्क्तयः, कुत्रचित् च षट् पङ्क्तयः सन्ति। अस्याः मातृकायाः टीकालेखने एकस्यां पङ्क्त्यां प्रायः पञ्चाशत् अक्षराणि सन्ति तथा मूलपद्यलेखने प्रायः सप्तविंशतिः अक्षराणि सन्ति। मूलश्लोकेषु प्रथमतः षट् पर्यन्तं श्लोकेषु शब्दानाम् अन्वयक्रमं दर्शयितुं लेखकेन लघुना अक्षरेण १,२,३,४,....इति सङ्ख्यानां प्रयोगः कृतः अस्ति। सर्वेषु श्लोकेषु शब्दानां मध्ये स्थानं (स्पेस्) कर्तुं शब्दानाम् उपरि ′ इति चिह्नं कृतम् अस्ति। यत्र सन्धिमध्ये अकारः भवति तत्र अकारं पृथक् कर्तुम् अधः अवग्रहचिह्नं (ऽ) कृतम् अस्ति। मातृकायाः वामतः उपरि **म.टी.१** इति पृष्ठसङ्ख्यानिर्देशः अस्ति तथा दक्षिणतः केवलम् अधोभागे पृष्ठसङ्ख्यानिर्देशः अस्ति। टीकायाः आरम्भः तथा स्तोत्रस्य आरम्भः मङ्गलसूचकचिह्नेन भवति। टीकायाः आरम्भवाक्यं " **श्रीगणेशाय नमः। महिम्नेति। हे हर ! हे शम्भो !.......**" तथा अन्तवाक्यम् **"अहरहरनवद्यमिति ३४"** अस्ति। स्तोत्रस्य आदिवाक्यं " **महिम्नः पारं ते.......**" तथा अन्तवाक्यम् **"इति श्रीपुष्पदन्ताचार्य्यविरचितं महिम्नाख्यं स्तोत्रं समाप्तम्।"** अस्ति। मातृकायाः अन्ते **"शं शश्वद् भवतु पाठकस्येशप्रसादात् ।। श्रीः ।।"** इति अस्ति।

कोष्ठक माध्यमेन मातृकायाः सरलतया परिचयः अधः प्रस्तूयते।

- मातृकायाः नाम - शिवमहिम्नःस्तोत्रटीका
- मातृकायाः पञ्जीकरणसङ्ख्या - २७४८१
- मातृकायाः प्राप्तिस्थानम्- आचार्यश्रीकैलाससागरसूरिज्ञानमन्दिरकोबागान्धिनगरम्

- मातृकायाः लिपिः - देवनागरी
- मातृकायाः आधारपत्रम् - कर्गजपत्रम्
- मातृकायाः पृष्ठसङ्ख्या - ०९
- मातृकायाः स्थितिः - उत्तमा
- मातृकायाः उपलब्धिः - सम्पूर्णा
- मातृकायाः कलेवरम् - १०½ × ५
- मातृकायाः कर्ता - अज्ञातः
- मातृकायाः कालः - अज्ञातः
- टीकायां प्रतिपत्रं पङ्क्तयः - उपरि = ६/७, अधः = ४/५/६
- मूलपद्ये प्रतिपत्रं पङ्क्त्यः - ४/५
- टीकायाः आदिवाक्यम् - " श्रीगणेशाय नमः। महिम्नेति। हे हर! हे शम्भो!......."
- टीकायाः अन्तवाक्यम् - "अहरहरनवद्यमिति ३४"
- मूलस्तोत्रस्य आदिवाक्यम् - " महिम्नः पारं ते......."
- मूलस्तोत्रस्य अन्तवाक्यम् - "इति श्रीपुष्पदन्ताचार्य्यविरचितं महिम्नाख्यं स्तोत्रं समाप्तम्।"
- मातृकायाः अन्तवाक्यम् - "शं शश्वद् भवतु पाठकस्येशप्रसादात् ।। श्रीः ।।"
- टीकायां प्रतिपङ्क्ति अक्षराणि - प्रायः ५०
- मूलस्तोत्रे प्रतिपङ्क्ति अक्षराणि - प्रायः २७

## चतुर्थं प्रकरणम् - “मूलग्रन्थः”

श्रीगणेशायनमः।महिम्नेति।हेहरहेशंभोतेमहिम्नःमहित्वस्यपरंपारमत्यर्थमविदुषोऽवसानमजानतःपुरुषस्य स्तुतिर्यद्यसदृशीतेअननुरूपातत्तर्हिव्रह्मादीनामपिगिरोवाचःत्वयित्वद्विषयेऽवसन्नाःकुंठिताः।अथपक्षांतरेण। सर्वःसमस्तःपुरुषःस्वमतिपरिणामावधियथाभवतितथागृणन्स्तुवन्नवाच्यःअनिंद्यइतिमतंस्वस्यमतिर्बुद्धि स्तस्याःपरिणामःपरिकरःअवधिःसीमायस्मिन्नितिक्रियाविशेषणम्एवंचेन्ममापिस्तोत्रेतवस्तुतौएषःपरिक रोयत्रःनिरपवादःनिर्दोषइतिवाक्यार्थः।१।हेदेवतवमहिमावाङ्मनसयोःपंथानंमार्गमतीतःअतिक्रांतः।वाक्चमन श्चवाङ्मनसेअचतुरेत्यादिसूत्रेणसमासांतोनिपातःतयोः।किंभूतःयंमहिमानंश्रुतिरप्याम्नायोपिअतद्व्यावृत्या चकितमभिधत्ते।तन्नभवतीत्यतत्अतदोव्यावृत्तिःपर्य्युदासःवर्जनंतेना

**महिम्नःपारंतेपरमविदुषोयद्यसदृशीस्तुतिर्व्रह्मादीनामपितदवसन्नास्त्वयिगिरः।अथावाच्यःसर्व्वःस्वमतिप रिणामावधिगृणन्ममाप्येषस्तोत्रेहरनिरपवादःपरिकरः“१”अतीतःपंथानंतवचमहिमावाङ्मनसयोरतद्व्यावृ त्यायंचकितमभिधत्तेश्रुतिरपि।सकस्यस्तोतव्यःकतिविधगुणःकस्यविषयःपदेत्वर्वाचीनेपततिनमनःकस्य नवचः“२”।।**

पिचकितंसभयंयथास्यात्तथाऽभिधत्तेव्रूतेनतुइदंभवतीतिनिर्दिश्याभिधत्ते।सकस्यस्तोतव्यःकेनस्तोतुंशक्यः कस्तुवंतोयोदोषःकतिविधाःकतिप्रकाराःगुणाःयस्यासौकतिविधगुणःकियंतोवागुणायस्येतिज्ञातुंनशक्यते। कस्यविषयोगोचरः।अनेनपरमार्थस्वरूपज्ञानंकस्यापिनास्तीत्यर्थःस्मृतिपुराणोक्तंस्वरूपंसर्वोजानातीतिवक्तु माह।अर्वाचीनेलयसृष्टिस्थितिमुख्यतयाप्राण्यनुग्राहकेपदेस्थानेपुनश्चितंनपततिनप्रसरतिकस्यवचोनपतति ऽपितुममापीतिवाक्यार्थःइदानींमहात्म्यस्यस्तोतुम् परिहर्त्तुमाह २

हेव्रह्मन्तवसुरगुरोर्वृहस्पतेरपिवाग्वचः विस्मयपदंआश्चर्यस्थानंभवतिकिंनभवतीत्यर्थः किंभूतस्यतव।वाचः गिरः निर्मितवतोरचयतः।किंभूतावाचः।मधुस्फीतामधुनामाधुर्यगुणेनस्फीताःयुक्ताः।पुनःकिं0वाचः।परमंअमृतंउत्कृष्टंअमृतं।अतःस्वरूपत्त्वात्अमृतमित्युपचारःअस्मदादेरर्बाक्किंपुनःयद्येवंस्तुतिःकिमर्थमारभ्यतइत्याह।ममबुद्धिस्तुएतांमदीयांवाणींतवगुणकथनपुण्येनपुनामीत्यस्मिन्नर्थेव्यवसिताकृतोद्यमा।आत्मस्तुतेःसावकासत्वंप्रतिपाद्यइदानींमीमांसकाःईश्वरोनास्तीतिवदंतितन्निराकर्त्तुमाह[३]तवैश्वर्येति।हेवरदतवयदैश्वर्यंतज्जगदुदयरक्षाप्रयकृत्।जगतांलोकानांउदयःउत्पत्तिःरक्षापरिपालनंप्रलयोविनाशश्चेतिद्वंद्वःतान्करोतितत्कृत्।

**मधुस्फीतावाचःपरमममृतंनिर्मितवतस्तवव्रह्मन्किंवागपिसुरगुरोर्विस्मयपदं।ममत्वेतांवाणींगुणकथनपुण्येनभवतःपुनामीत्यर्थेस्मिन्पुरमथनबुद्धिर्व्यवसिता“३”तवैश्वर्य्यंयत्तज्जगदुदयरक्षाप्रलयकृत्त्रयीवस्तुव्यस्तंतिसृषुगुणभिन्नासुतनुषु।अभव्यानामस्मिन्वरदरमणीयामरमणींविहंतुंव्याक्रोशींविदधतइहैकेजडधियः“४”**

किंभूतंत्रय्येववेदत्रयंवस्तुप्रतिपाद्यंतथातिसृषुतनुषुमूर्त्तिषुव्यस्तंबिभज्यनिक्षिप्तं।किं0तनुषु।गुणभिन्नासुगुणैःसत्वरजस्तमोभिर्भिन्नासुपृथग्भूतासुव्रह्मविष्णुशिवात्मकासु।इहलोके।केचिज्जडधियोमंदबुद्धयःअस्मिन्नैश्वर्येव्याक्रोशींनिंदांविदधतेकुर्वतेतद्विहंतुंविनाशयितुं।किं0व्याक्रोशीं।अभव्यानामसत्पुण्यभाजांरमणीयांरम्यां।पुनःकिं0व्याक्रोशीं।परमार्थतस्तुअरमणीमशुभांएतामियंव्याक्रोशींप्रगट्यन्नाह।४।। श्रीः ।।

तिसृषुगुणभिन्नासुतनुषुतवैश्वर्यंव्यस्तमिन्यनेनधातृरूपेणसृजतिविष्णुरूपेणपालयतिरूद्ररूपेणसंहरतीत्युक्तंतद्दूषयन्नाह।ईश्वरोधाताभूत्वाव्रह्मरूपेणत्रिभुवनंसृजन्किमीहःसन्सृजति।काईहाचेष्टाव्यापारोयस्यसतथोक्तःकिमाधारःसन्सृजतिकःआधारोधिकरणंयस्यसकुत्रस्थित्वासृजतीत्यर्थःकिमुपादानःसृजतिनिर्मिमीते। कार्यंयत्रसमवेतितदुपादानकारणंयथाघटस्यमृत्पिंडउपादानकारणंपटस्यतंतवस्तद्वदत्रलोकनिर्माणेधातुरुपादानकारणंविनाकार्यंनसिध्यतीतिभावःइत्यनेनप्रकारेणायंकुतर्कःजगतोजनस्यमोहायमोहमुत्पादयितुंकांश्चित्पुरुषान्मुखरयतिवाचालयति।कुतर्कोदुरूहःकिंभूतान्हतधियोदुर्बुद्धिन्।किं0कुतर्कः।त्वय्यनवसरदुःस्थःअवसरोऽबकाशःनावसरोनवसरस्तेनदुःस्थःदुर्बलस्तुच्छइत्यर्थःत्वयिविषयेतस्यानवसरएवकिंभूतेत्वयि।अतक्यैश्वर्य्येऽतर्क्यंअनूद्यंऐश्वर्यंयस्यतस्मिन् ५ हेऽमरवरदेवश्रेष्ठ।भूधराद्यवयव

**किमीहःकिंकायःसखलुकिमुपायस्त्रिभुवनंकिंमाधारोधातासृजतिकिमुपादानइतिच।अतक्यैश्वर्य्येत्वय्यनवसरदुःस्थोहतधियःकुतर्कोयंकांश्चिन्मुखरयतिमोहायजगतः“५”अजन्मानोलोकाःकिमवयववंतोपिजगतामधिष्टातारंकिंभवविधिरनादृत्यभवति।अनीशोवाकुर्याद्भुवनजननेकःपरिकरोयतोमंदास्त्वांप्रत्यमरवरसंशेरतइमे“६” ।।**

वंतोपिलोकाःअजन्मानःकिंजन्मरहिताःकिंनविद्यतेजन्मउद्भवोयेषांतेऽजन्मानःकिम्शब्दःआक्षेपे।यःऽवयववान्सोऽजन्मेतिनोपपद्यतेतथापिसावयवोघटःउत्पत्तिमानएवदृश्यतेभवतुसावयवःउत्पत्तिमान्एतावताकिंलभ्यतइत्याह।जन्मवतांलोकानांभवविधिरुत्पत्तिविधिरधिष्ठातारमुत्पादकंकत्तारमनादृत्यमनपेक्ष्यभवतिकिंयतोयस्मात्कारणादिमेमंदाःस्वल्पबुद्धयोमीमांसकादयस्त्वांप्रतिमुद्दिश्यसंशेरतेसंशयंकुर्वंतिअतस्त्वांप्रतिसंदेहोनकर्त्तव्यइत्यभिप्रायः।एतावत्युक्तेकिंपुनःपूर्वपक्षेभवतुअधिष्टाताएतावताकथमीश्वरसिद्धिरिति।अनीश्वरईश्वरादन्योपिकुर्यादेतदपिधर्षयतिभुवनजननेलोकोत्पादनेकःपरिकरःकःसमर्थःईश्वरंविनानान्यःसमर्थइत्यर्थः ६ ।।

त्रयाणांवेदानांसमाहारस्त्रयीवेदविहितोमार्गःएकोमार्गः।सांख्यंयोगःयोगशास्त्रंवैशेषिकशास्त्रंबाशिष्टादिकापिलं शास्त्रंपंचविंशतिः।शास्त्रंबशिष्टादिसएकोमार्गःपाशुपतमतांवागमःमतशब्देनसिद्धांताःप्रकीर्तिताःसिमसिद्धांतः शिवसिद्धांतःपंचरात्रसिद्धांतइत्यादयःसिद्धांताःतथावैष्णवमितिकेशवपंचरात्रयोर्ग्रहणंएतत्पंचसंख्यापरिच्छि न्नंप्रस्थानंतत्प्रस्थानेप्रभिन्नेनानात्वंगतेसति।प्रस्थीयतेगम्यतेऽनेनेतिप्रस्थानंमार्गः।यतइदंपरंतत्त्वंअदःप रंपथ्यंसेव्यंग्राह्यंच।कस्मात्।रुचीनांवैचित्र्यात्।अतोरुचयोविचित्राः।यतउक्तं।एकएवपरंतत्त्वमभिन्नंपरमार्थ तः।तदेवरुचिवैचित्र्यान्नानात्वंसमुपागतं।१।ऋजुकुटिलनानापथजुषांकेचिन्मार्गाःऋजवःप्रांजलाःकेचिन्मा र्गाःबक्राइतिअनेकमार्गःसेविनांनृणांत्वमेकोगम्यंप्राप्योसि।येनकेनवामार्गेणगच्छतांत्वमेवप्राप्यइत्यर्थः।प यसामर्णवोयथाऋजुकुटिलमार्गेणगच्छतांजलानांसमुद्रएवप्राप्यस्तथात्वमित्यर्थः[७]महोक्षेति।महांश्चासौउ क्षाचमहोक्षःमहद्बलीवर्द्धःमहोक्षइतिअचतुरादिसू

**त्रयीसांख्ययोगःपशुपतिमतंवैष्णवमितिप्रभिन्नेप्रस्थानेपरमिदमदःपथ्यमितिच।रुचीनांवैचित्र्यादृजुकुटिल नानापथजुषांनृणामेकोगम्यस्त्वमसिपयसामर्णवइव"७"महोक्षःखट्वांगंपरशुरजिनंभस्मफणिनःकपालंचेती यत्तववरदतंत्रोपकरणम्।सुरस्तांतामृद्धिंदधतितुभवद्भ्रूप्रणिहितांनहिस्वात्मारामंविषयमृगतृष्णाभ्रमयति"८" ।।**

त्रेणनिपातः।खट्वांगंप्रसिद्धमेतत्।अथखंडस्योपरिव्रह्मकपालंखट्वांगमुच्यते।परशुःकुठारः।अजिनंमृगचर्म्म ।भस्मदग्धमयि।फणिनःसर्पाः।कपालंशिरोस्थिकरोटीचइतिशब्दसमाहारौवर्तते।इयदेतावदेव।हेवरदअभयदत वतंत्रोपकरणंउपक्रियतेऽनेनेतिउपकरणंउपकारइत्यर्थः।तंत्ररूपेणप्रपंचरूपेणस्थितमुपकरणमेतावदेव।सुरा स्तुपुनइंद्रादयस्तांतामृद्धिंसंपदांदधतिधारयंति।किं0ऋद्धिं।भवद्भ्रूप्रणिहितां।भवतस्तवभ्रूक्षेपमात्रेणोपनीतां दत्तामित्यर्थः।यद्येवंएतावतीशक्तिरस्तितर्हिभगवान्स्वयंकस्मान्नोपभुंक्तइत्याह।नहीत्यादिस्वात्मनिस्वकीये आत्मनिआरमतिक्रीडयतिस्वात्मारामंभगवंतंपरमयोगिनंनभ्रमयतिनचालयतिएतेनभगवतःपरमयोगित्वंप्र गटितमिंद्रियगोप्यमित्यर्थः ८ ।। श्रीः।।

ध्रुवमिति।हेपुरमथनत्रिपुरदाहक।कश्चिद्वद्दमतदर्शनानुयायीसर्वमिदंजगद्ध्रुवंनित्यंगदतिनकदाचिदनीश्वरंजगदिदमितिव्रवीतिअपरोऽन्यःक्षपणोबौद्धस्तुअध्रुवमनित्यंवदति।अन्यस्तार्किकोवीतरागीमाध्यस्थमवलंबमानएतस्मिन्समस्तेजगतिध्रोव्याध्रोव्येनित्यानित्येव्यस्तविषयेसतिविक्षिप्तप्रमाणभूमौसत्यांवदति।आकासादिकंनित्यंघटपटादिकमनित्यंव्रूतइत्यर्थः।एवंनानाप्रकारेणवदद्भिस्तैर्विस्मितोपहसितोव्याकुलितइवाहंत्वांस्तुवन्सन्जिह्रेमिलज्जे।तर्हिस्तुतौकथंप्रवर्त्तसेइत्यत्राह।मुखरताबाचालताचपलताननुनधृष्टाअपिधृष्टाएवइत्यर्थःइदानींपुराणप्रसिद्धंव्रह्मविष्णुअपरंलिगोद्भवंस्तुवन्नाह।९।तवैश्वर्यमिति।हेगिरिशशंकरतवयदैश्वर्यंमहात्म्यंयत्नान्महताप्रयत्नेनपरिच्छेतुंएतावदितिपरकलयितुंउपरिविरिंचिर्व्रह्मायातः

**ध्रुवंकश्चित्सर्वंसकलमपरस्त्वध्रुवमिदंपरोध्रौव्याध्रौव्येजगतिगदतिव्यस्तविषये।समस्तेप्येतस्मिन्पुरमथनतैर्विस्मितइवस्तुवन्जिह्रेमित्वांनखलुननुधृष्टामुखरता“९”तवैश्वर्यंयत्नाद्यदुपरिविरिंच्योहरिरधःपरिच्छेत्तुंयातावनलमनलस्कंधवपुषः।ततोभक्तिश्रद्धाभरगुरुगृणद्भ्यांगिरिशयत्स्वयंतस्थेताभ्यांतवकिमनुवृत्तिर्नफलति“१०”**

अधःपातालंहरिर्यातःद्वावप्यनलंयातौअशक्तौजातौ।किंभूतस्यतव।अनलस्कंधवपुषःअनलस्कंधोऽग्निसमूहःवपुःशरीरंतस्यएतेनकिमुक्तंवायुतत्त्वपर्यंतंलिंगस्यमस्तकंकालाग्निपर्यंतलिंगस्यमूलंव्रह्मणोव्रह्मांडव्याप्तिःविष्णुर्भगवानतएतत्त्वनिवासी।क्वचिदनिलस्कंधवपुषइतिपाठस्तत्रचवपुषःशरीरस्यततःपश्चाद्भक्तिश्रद्धाभरगुरुगृणद्भ्यांस्तुवद्भ्यांव्रह्मविष्णुभ्यांतवैश्वर्यंस्वयमेवतस्थेस्वेनैवप्रकाशितमित्यर्थः।प्रकाशनस्थेयाख्ययोश्चेतितिष्टतेरात्मनेपदं।यथाभाद्राशपतिष्टततिष्यतेकन्यतिताभ्यांइतितादर्थेचतुर्थी।हेदेवतवानुवृत्तिःसेवाकिंनफलतिकिंनप्रयच्छतिसर्वमपिफलतीत्यर्थःइदानींतदेवदृढयितुमाह।। १०।।

हेत्रिपुरहरदशास्योरावणःअयत्नादनायासेनत्रिभुवनंत्रैलोक्यंआपाद्यअबैरिव्यतिकरंसत्वसंपर्क्करहितंनिःकंट कंकृत्वारणकंडूपरवशान्नणेयाकंडूखर्ज्जुतयापरवशान्तदधीनान्युद्धलंपटानित्यर्थः।बाहून्यदभृताधृततदिदं स्थिरायाअचलायास्तवभक्तेर्बिस्फूर्ज्जितंविस्फारणंविजृंभणं।किंभूतायाःभक्तेः।शिरांस्येवपद्मानितेषांश्रेणीपं क्तिस्तयारचिताआरोपिताचरणांभोरुहाणांवलिःपूजोपहारिःसाशिरःपद्मश्रेणीरचितचरणांभोरुहःवलिस्तस्या। स्त्वद्भक्तेःफलंनिरूपितं।इदानींत्वयितिरस्कारफलंनिरूपयितुमाह ११अमुष्येति।हेहरअमुष्यरावणस्यपाताले रसातलेपिप्रतिष्ठास्थितिरलभ्याअप्राप्यादुर्ल्लभाआसीत्।किं0अमुष्य0।भुजवनंबाहुसमुहंबला

**अयत्नादापाद्यत्रिभुवनमवैरिव्यतिकरंदशास्योयद्बाहूनभृतरणकंडूपरवशान्।शिरःपद्मश्रेणीरचितचरणांभोरुहव लेःस्थिरायास्त्वद्भक्तेस्त्रिपुरहरविस्फूर्ज्जितमिदम्“११”अमुष्यत्वत्सेवासमधिगतसारंभुजवनंबलात्कैलाशेपि त्वदधिवसतौविक्रमयतः।अलभ्यापातालेप्यलसचलितांगुष्टशिरसिप्रतिष्टात्वय्यासीद्ध्रुवमुपचितोमुह्यतिख लः“१२”**

त्वदधिवसतौतवनिवासस्थानेकैलाशेपिबिक्रमयतःपराक्रमयतः।किं0भुजवनं।त्वत्सेवासमधिगतसारं।त्वत्से वयाभवदाराधनेनसमधिगतःप्राप्तःसारोबलोयेनतत्तथोक्तं।क्वसति।अलसचलितांगुष्टशिरसि।अलसेनानायासे नाप्रयत्नेनचलितमधःकृतमंगुष्टशिरोयेनसअलसचलितांगुष्टशिरस्तस्मिन्सतित्वयिऽहोयुक्तमेतत्।ध्रुवंनिश्चि तंउपचितःसमृद्धःवृद्धिंगतःसन्खलोदुर्ज्जनोमुह्यतिमोहमुपयाति।इदानींबाणासुरानुग्राहिणंभगवंतंस्तुवन्नाह ।१२

यदिति।बाणोबाणासुरःसुत्राम्णोवासवस्यऋद्धिंसंपदांयदधश्चक्रेतिरश्चकार।किं0भूतामृद्धिं।परमोच्चैःपरमोन्नतामित्यर्थः।किंभूतां।सतीं।अत्यंतमहतीं।किं0बाणः।परिजनविधेयत्रिभुवनः।परिजनसेवकस्येवविधेयंवश्यंत्रिभुवनंयस्यसस्तथोक्तः।तस्मिन्बाणेतन्नचित्रंनाश्चर्य्यमस्ति।किंभूतेबाणे।त्वच्चरणयोर्वरिवसितरिशुश्रूषकेपूजयितरि।कथमित्याह।त्वयिशिरसाकृत्वाअवनतिर्नम्रताकस्याप्युन्नत्यैनभवतिअपितुसर्वेषामेवभवतीतितात्पर्यार्थः।सांप्रतंकालकूटविषापहरणप्रतिपादनद्वारेणभगवंतंस्तुवन्नाह १३ अकांडेति।हेत्रिनयन।विषंकालकूटंसंहृतवतः(गिलितवतः)तवकंठगलेयःकल्माषःकालिमाआसीत्संजातःसश्रियंशोभांनकुरुतेइतिनकुरुतेएव।अहोआश्चर्यं।किंविधस्यते।अकांडव्रह्मांडक्षयचकितदेवासुरपाविधेयस्य।अ

**यदृद्धिंसुत्राम्णोवरदपरमोच्चैरपिसतीमधश्चक्रेबाणःपरिजनविधेयत्रिभुवनः।नतच्चित्रंतस्मिन्वरिवसितरित्वच्चरणयोर्नकस्याप्युन्नत्यैभवतिशिरसस्त्वय्यऽवनतिः“१३”अकांडव्रह्मांडक्षयचकितदेवासुरकृपाविधेयस्यासीद्यस्त्रिनयनविषंसंहृतवतः।सकल्माषःकंठेतवनकुरुतेनश्रियमहोबिकारोपिश्लाघ्योभुवनभयभंगव्यसनिनः“१४”**

कांडेऽसमयेऽकालेव्रह्माण्डस्यक्षयोविनाशस्तस्माच्चकिताभीतायेदेवासुरास्तेषुकृपादयातस्याविधेयस्यवश्यस्य(कृपापरायणस्यइत्यर्थः)।ननुकथंशुद्धस्फटिकसंकाशनीलत्वलक्षणोविकारःशोभांकुरुतइत्याह।बिकारइति।भुवनभयभंगव्यसनिनःभुवनानांलोकानांभयस्यभंगेदूरीकरणेव्यसनिनःपरोपकारप्रवृत्तस्यपुरुषस्यप्रकारांतरप्राप्तिःश्लाघ्याशंसनीयाइत्यर्थःइदानींकामनिग्रहपरांस्तुतिमाह १४

असिद्धार्थाइति।यस्यस्मरस्यविशिखावाणाःजगतिलोकेक्वचिदपिकदाचिदप्यसिद्धार्थाःअकृतप्रयोजनाःनैव निवर्त्ततेकिंतुनित्यंसर्वथाकृतप्रयोजनाभवंतीत्यर्थः।किं0तव।जयिनःजितवतः।किं0जगति।सदेवासुरनरे।दे वाश्चासुराश्चनराश्चदेवासुरनरास्तैःसहवर्त्ततइतिसदेवासुरनरंतस्मिन्स्वर्गमृत्युपातालेपीत्यर्थः।हेईशसस्मर स्त्वांइतरसुरसाधारणमन्यदेवतुल्यंपश्यन्सन्स्मर्त्तव्यात्मास्मरणीयोभूतनष्टशरीरोऽभवदित्यर्थः।अत्रोक्तेव शिष्टात्मेश्वरेषुपरिभवोऽवज्ञानपथ्यःसुखकारीनभवतीत्यर्थः।अतिबलवान्कश्चनराक्षसःसंध्यासमयेइदंजगत्क्ष यमुत्पद्यतेतन्निवारणार्थंतस्मिन्कालेभगवांस्तांडवंकरोति।सांप्रतितांडवसबंधस्तुतिंकर्त्तुमाह १५

**असिद्धार्थानैवक्वचिदपिसदेवासुरनरेनिवर्त्ततेनित्यंजगतिजयिनोयस्यविशिखाः।सपश्यन्नीशत्वामितरसुर साधारणमभूत्स्मरःस्मर्त्तव्यात्मानहिवशिषुपथ्यःपरिभवः"१५"महीपादाघाताद्व्रजतिसहसासंशयपदंपदंवि ष्णोर्भ्राम्यद्भुजपरिघरुग्णग्रहगणं।मुहुर्द्यौर्दौस्थ्यंयात्यनिभृतजटाताडिततटाजगद्रक्षायैत्वंनटसिननुवामैववि भुता"१६"**

महीति।हेदेवजगद्रक्षायैलोकत्राणायत्वंनटसिनृत्यसितांडवंकरोषिननुभोतवविभुतामहत्त्वंवामैवविपरीतैव।क थमित्याह।महीपृथ्वीपादाघातात्पादताडनात्सहसाशीघ्रंसंशयपदंव्रजतियातिअस्तिनास्तिइतिसहसाकिंत्रुट्य तिकिंअधःप्रविशतीतिसंशयपदंगच्छतीत्यर्थः।तथाविष्णोःपदमाकाशमीदृशंजातं।भ्राम्यद्भुजपरिघरुग्णग्रहग णं।भ्राम्यंतःइतस्ततश्चलंतश्चतेभुजाश्चतेएवपरिघाःअर्गलास्तैरुग्णाःभग्नाःग्रहाणांगणाःसमूहायस्मिन्तत्तथो क्तं।अन्यच्चवैपरीत्यंद्यौःस्वर्गःमुहुर्दौस्थ्यंदुस्तरत्वंयाति।किं0द्यौः।अनिभृतजटाताडिततटा।अनिभृताभिरनि श्चलाभिर्जटाभिस्ताडितंतटंयस्यासातथोक्ता।पूर्वमगस्तमुनिनाहस्तपात्रीकृतोजलधिस्तेनपुनःपुनःपरमेश्वरे णदेवाभ्यर्थितेनभगवतागंगाजलैःपूरितःइत्येतत्प्रबंधस्तुतिकर्त्तुमाह १६

वियदिति।हेदेववारांपयसांयः प्रवाहस्तवशिरसिजटामुकुटेपृषतवल्लघुसूक्ष्मंयथास्यात्तथादृष्टः।किं0प्रवाहः।वियद्व्यापी।वियदाकाशंव्याप्तुंशीलंयस्यसः।पुनःसकिंबिधः।तारागणगुणितफेनोद्गमरुचिः।ताराणांनक्षत्राणांगणःसमूहस्तेनगुणितउद्भावितःशंकितःफेनोद्गमडिंडीरोत्पत्तेरुचिःशोभायस्यसस्तथोक्तः।तेनप्रवाहेणजगद्वीपाकारंजलमध्यस्थितमभूत्।खंडोद्वीपस्तद्रूपमकारि।किं0जगत्।जलधिवलयं।जलधिःसमुद्रोवलयंपरिखंयस्यसस्तथोक्तः।अनेनैवहेतुनातत्रदिव्यंसदानंदात्मकंवपुःशरीरंहेधृतमहिमेत्युन्नेयमूहनीयं।धृतोऽद्भुतमहिमासर्वज्ञत्वंसर्वकर्तृत्वंयेनवपुषातथोक्तः।सांप्रतिपुरदहनाडंबरविषया

**वियद्व्यापीतारागणगुणितफेनोद्गमरुचिःप्रवाहोवारांयःपृषतलघुदृष्टःशिरसिते।जगद्वीपाकारंजलधिवलयंतेनकृतमित्यनेनैवोन्नेयंधृतमहिमदिव्यंतववपुः“१७”रथःक्षोणीयंताशतधृतिरगेन्द्रोधनुरथोरथांगेचंद्रार्कौरथचरणपाणिःशरइति।दिधक्षोस्तेकोयंत्रिपुरतृणमाडंबरविधिर्विधेयैःक्रीडंत्योनखलुपरतन्त्राः(स्वाधीनाइत्यर्थः)प्रभुधियः “१८”**

स्तुतिमाह १७ रथइति।हेदेवत्रिपुरतृणंदिधक्षोःदग्धुमिच्छोस्तेकोयमाडंबरबिधिःकोयंसंभ्रमःकिमर्थमितियावत्।तमेवाडबरंदर्शयन्नाह।रथःक्षोणीभूमिः।यंतासारथीशतधृतिर्व्रह्मा।अगेंद्रोहिमवान्धनुःचापं।अथोनंतरंरथांगेचक्रेचंद्रार्कौसोमसूर्यौ।रथचरणपाणिर्विष्णुःशरोबाणः।इतिशब्दःप्रकारवचनेऽथवायुक्तमेवैतत्प्रभुधियःस्वामिनांबुद्धयःपरतंत्रानखलुफलप्रधानानभवंति।यावताफलंसिध्यतितावदेवसंपादयंतीत्यर्थःकिंबिधाःप्रभुधियः।बिधेयैर्भृत्यजनैःक्रीडंत्योबिनोदयंत्यः।त्रिपुरमेवतृणंतृपुरतृणं।इदानींहरिश्चक्रलाभायईश्वरपादयोःकमलसहस्रपूजांकृतवानितिप्रबद्धांस्तुतिमाह १८

हेत्रिपुरहरहरिःश्रीकृष्णस्तेतवपदयोःसाहस्रंसहस्रसंख्योपेतंकमलबलिंपद्मपूजामाधायनिक्षिप्यतस्मिन्वलौए केनकमलेनकुनेहीनेसतिनिजंआत्मनीयंनेत्रकमलंउदहरन्नुत्पाटितवान्।असौभक्त्युद्रेकःभक्त्यातिशयंनेत्र कमलंचक्रवपुषाचक्ररूपेणपरिणतिंपरिणामंगतःप्राप्तःसन्त्रयाणांजगतांस्वर्गमृत्युपातालानांरक्षायैत्राणायजा गर्त्तिबुध्यतिस्फुरतिअप्रमत्तस्तिष्ठतीत्यर्थः।इदानींमीमांसबादीयोवेदस्यनित्यतांमन्यमानःनकदाचिदनीदृशं जगदिदमितिप्रतिपाद्यभगवतोजगत्कर्तृत्वंप्रतिपाद्यतेतन्मतनिराकरणद्वारेणदेवंस्तोतुमाह १९ क्रताविति।

**हरिस्तेसाहस्रंकमलबलिमाधायपदयोर्यदेकोनेतस्मिन्निजमुदहरन्नेत्रकमलं।गतोभक्त्युद्रेकःपरिणतिमसौच क्रबपुषात्रयाणांरक्षायैत्रिपुरहरजागर्त्तिजगताम्।“१९”क्रतौसुप्तेजाग्रत्त्वमसिफलयोगेक्रतुमतांक्वकर्मप्रध्वस्तंफ लतिपुरुषाराधनमृते।अतस्त्वांसंप्रेक्ष्यक्रतुषुफलदानप्रतिभुवंश्रुतौश्रद्धांबद्ध्वादृढपरिकरःकर्मसुजनः“२०”**

हेदेवक्रतौयागेक्रियात्मकत्वेनोपपत्तिप्रध्वंसितत्वान्नष्टत्वंचास्ति।क्रतौसुप्तेविनष्टेसतिक्रतुमतांयज्वनांफल योगेस्वर्गादिफलसंबंधेत्वंजाग्रदसिफलंदातुंसावधानोसि।कथमेतदित्याह।प्रध्वस्तंविनष्टंकर्मक्रियापुरुषाराध नंकृतेईश्वराराधनंविनाक्वफलतिकुत्रापिनेत्यर्थः।अतःकारणाज्जनोलोकःक्रतुषुफलदानप्रतिभुवंफलदातारं त्वांसंप्रेक्ष्यश्रुतौवेदवाक्येश्रद्धांबद्ध्वाविश्वासंकृत्वाफलयोगेदृढपरिकरःकृतयत्नः।इदानींपूर्वश्लोकसंबंधार्थमेव दक्षयागभ्रंशदृष्टांतेनदृढीकुर्व्वन्नाह २०

हेशरणदक्रियादक्षःक्रियासंयोगेदक्षकुशलःदक्षोदक्षप्रजापतिर्यंयमानःकिंभूतस्तनुभृतांशरीरिणांअधीशोऽधिप तिःऋषीणांआर्त्विज्यंऋषयोवशिष्टादयइत्यर्थः।सदस्याइंद्रादयएवसदसिस्थिताःएवंबिधासामग्रीकस्यापिदक्ष स्यत्वत्तोभवतःसकाशात्क्रतुभ्रंशोऽभूत्किंभूतस्यत्वत्तःक्रतुफलविधानव्यसनिनःक्रतोःफलस्यबिधानेसंपादने व्यसनिनःउत्सुकात्।एवदुक्तंभवतित्वयिभक्तिहीनत्वाद्दक्षस्यईप्सिताफलप्राप्तिर्नसंजाता।युक्तमेतत्।ध्रुवंनि श्चितंश्रद्धाविधुरंविश्वासरहितंयथास्यात्तथाकर्तुःकुर्वतःपुरुषस्यमखायागाऽभिचारायानर्थायभवंतिसंप्रतिव्राह्म णःदुहित्राभिलाषुकस्यनिग्रहसामर्थ्यमैश्वर्यंस्तुवन्नाह २१ प्रजानाथमिति

**क्रियादक्षोदक्षःक्रतुपतिरधीशस्तनुभृतामृषीणामार्त्विज्यंशरणदसदस्याःसुरगणाः।क्रतुभ्रंशस्त्वत्तःक्रतुफल विधानव्यसनिनोध्रुवंकर्त्तुःश्रद्धाविधुरमभिचारायहिमखाः"२१"प्रजानाथंनाथप्रसभमभिकंस्वांदुहितरंगतंरोहि द्भूतांरिरमयिषुमृष्यस्यवपुषा।धनुष्पाणेर्यातंदिवमपिसपत्राकृतममुंत्रसंतंतेद्यापित्यजतिनमृगव्याधरभसः"२ २"**

हेनाथस्वामिन्धनुष्पाणेस्तेतवमृगव्याधरभसःमृगयुवेगआखेटकोत्साहऽमुंप्रजानाथंव्रह्माणंऽद्यापिनत्यज तिकिंभूतंप्र०प्रसभमत्यर्थंऽभिकंकामुकं।अतएवस्वांदुहितरंस्वसुतांऋष्यस्यवपुषामृगशरीरेणगतंकिंकर्त्तुमि च्छंतंरिरमयिषुरमयितुमिच्छंतं।किं०दुहितरं।रोहिद्भूतांमृगचीभूतामित्यर्थःपुनःकिंभूतंप्रजानाथंत्रसंतंभीतं अतएवदिवमाकाशंयातं।पुनःकिंविधंसपत्राकृतंवाणेनबिद्धंबाणाघातमित्यर्थःव्रह्माऽतिकामकत्वेनमृगीभू त्वास्वसुतांमृगरूपेणगंतुगतःअतःअधर्माणमेनंशरेणहंतुमीश्वरोमृगयुर्भूत्वाऽनुघातीत्यर्थःइदानीमपिगगने दृश्यतेसांप्रतंगौरीरूपाभिमर्दनपुरस्सरंभगवतःपरमयोगित्वंस्तोतुमाह २२

हेपुरमथनअह्नायशीघ्रंतृणवत्तृणमिवप्लुष्टंदग्धंधृतधनुषंपुष्पायुधंमदनंपुरोग्रतोदृष्ट्वापिदेवीगौरीयमनिरतदेहार्धघटनाद्योजनात्त्वांयदिस्त्रैण्यंस्त्रीपरतंत्रंस्त्रीलंपटमवैतिस्त्रीवशंजानातीतिचेत्हेवरदअद्धानिश्चितंयुवतयःस्त्रियःमुग्धाःमूर्खाःवतऽहोकिंभूतागौरीस्वलावण्याशंसास्वमात्मसौंदर्यंकीर्त्तयंतीस्वरूपाभिमानिनीत्यर्थः।यमेननिरंतत्परंयद्देहार्द्धंतस्यघटनासंपादनादित्यर्थः।सांप्रतमिच्छावर्णनप्रकारपुरःसरंस्तोतुमाह २३ श्मसानेष्विति।

**स्वलावण्याशंसाधृतधनुषमह्नायतृणवत्पुरःप्लुष्टंदृष्ट्वापुरमथनपुष्पायुधमपि।यदिस्त्रैणंदेवीयमनिरतदेहार्द्धघटनादवैतित्वामद्धावतवरदमुग्धायुवतयः।"२३"स्मशानेष्वाक्रीडास्मरहरपिशाचाःसहचराश्चिताभस्मालेपःस्रगपिनृकरोटीपरिकरः।अमंगल्यंशीलंतवभवतुनामैवमखिलंतथापिस्मर्तॄणांवरदपरमंमंगलमसि "२४"**

हेस्मरहर।तेस्मशानेषुपितृबनेषुआक्रीडाविहरणंतवपिशाचावैतालाःसहचराःसहवासिनःतथाआलेपोनुलेपनंचिताभस्ममृतशरीरदहनार्थोचितकाष्टनिचयश्चितातन्मयंभासितंतवस्रगपिनृकरोटीपरिकरःनरकपालसमूहःएवमनेनप्रकारेणहेवरदतवाखिलंशीलंस्वभावममंगल्यमशुभंभवतुनामतथापिस्मर्तॄणांचिंतयतांपरममुत्कृष्टंमंगलमसि।इदानींभगवतःपरमतत्त्वंनिरूपणद्वारेणस्तुवन्नाह २४ ।।

हेदेवयमिनोयोगिनःकिमपितत्त्वमालोक्यसच्चिदानंदरूपंकिमप्यनाख्येयरूपंप्रत्यक्षगोचरंवस्तुदृष्ट्वाआह्लादं सुखंदधतिधारयतिकिंकृत्वाइवऽमृतमयेऽमृतस्वरूपेह्रदेजलाशयेनिमज्येवकिलइतिसत्येतत्तत्त्वंभवान्त्वमेव ।किमशब्दःप्रसिद्धौ।किंकृत्वा।प्रत्यग्बिषयेभ्योनिवर्त्तचित्तेऽ।त्मनिमनोंतःकरणंसविधंसप्रकारंयोगशास्त्रेयथा स्यात्तथाऽवधायावस्थाप्य।किंभूतायमिनः।आत्तमरुतःआत्तागृहीतानिरुद्धामरुत्प्राणाद्यवयवायैस्तथोक्ताःपुनः किंभूताः।प्रहृष्यद्रोमाणःप्रहृष्यंतिपुलकितानिरोमाणियेषांतेतथोक्ताः।पुनःकिं0।प्रमदसलिलोत्संगितदृशः।प्र मदसलिलैरानंदबाष्पेरुत्संगिताःपरिप्लुतादृशोनेत्राणियेषांते।सांप्रतमष्टमू

**मनःप्रत्यक्चित्तेसविधमवधायात्तमरुतःप्रहृष्यद्रोमाणःप्रमदसलिलोत्संगितदृशः।यदालोक्याह्लादंह्रदइवनिम ज्यामृतयेदधत्यंतस्तत्त्वंकिमपियमिनस्तत्किलभवान्“२५”त्वमर्कस्त्वंसोमस्त्वमसिपवनस्त्वंहुतवहस्त्व मापस्त्वंव्योमत्वमुधरणिरात्मात्वमितिच।परिच्छिन्नामेवत्वंयिपरिणताबिभ्रतुगिरंनविद्मस्तत्तत्त्वंवयमिह हियत्त्वंन भवसि“२६”**

र्त्तिद्वारेणभगवंतंस्तुवन्नाह। २५ त्वमिति।हेदेवत्वमर्कःसूर्योसिसोमश्चंद्रोसित्वंपवनोवायुरसिहुतबहोग्निरग्नि रसिआपस्त्वमुदकमसिव्योमआकाशोसिधरणिर्भूमिरसिआत्मापरमात्मासिएवमनेनप्रकारेणपरिच्छिन्नासि यत्तयाआविष्टांगिरंवाणींत्वयिपरिणताःपक्वबुद्धयस्त्वत्स्वरूपविदस्त्वयिबिभ्रतुदधतुवयंतुइहलोकेयत्त्वंनभव सितत्तत्त्वंतत्तद्वस्तुनविद्मःनजानीमःइदानींप्रणवप्रतिपाद्यत्वेनभगवंतंस्तुवन्नाह २६

त्रयीमिति।हेशरणदॐइतिपदंसमस्तंसमस्तरूपेणव्यस्तंखंडरूपेणाक्षरविभागेनत्वांगृणातिस्तौति।किंकुर्व्व न्।अकाराद्यैस्त्रिभिर्बर्णैरकारोकारमकारैरेतैरभिदधत्त्रयीऋग्यजुःसामानिच।तिस्रोवृत्तीत्रीन्स्वरानुदात्तानुदात्त स्वरितान्।त्रिभुवनंत्रैलोक्यंऽथोनंतरंत्रीन्सुरानपिव्रह्मविष्णुरुद्रान्।अकारेणऋगुदात्तस्वर्गव्रह्मणःअभिधीयंतेउ कारेणयजुरनुदात्तमर्त्यवैष्णवअभिधीयंतेतथामकारेणसामस्वरितपातालरुद्राअभिधीयंते।किंबिधंॐमितिप दं।तेतवतुरीयंधामचतुर्थस्थानंअणुभिःसूक्ष्मैर्ध्वनिभिरवरुंधानंव्याप्नुवंतं।किंभूतंधाम।तीर्णविकृतितीर्णा

**त्रयींतिस्रोवृत्तीस्त्रिभुवनमथोत्रीनपिसुरानकाराद्यैर्वर्णैस्त्रिभिरभिदधत्तीर्णविकृति।तुरीयंतेधामध्वनिभिरवरुंधान मणुभिःसमस्तंव्यस्तंत्वांशरणदगृणात्योमितिपदम्“२७”भवःशर्वोरुद्रःपशुपतिरथोग्रःसहमहांस्तथाभीमेशा नावितियदभिधानाष्टकमिदं।अमुष्मिन्प्रत्येकंप्रविचरतिदेवश्रुतिरपिप्रियायास्मैधाम्नेप्रणिहितनमस्योस्मि भवते “२८”**

विकृतिर्येनतत्तीर्णविकृंतिविकाररहितमित्यर्थः।इदानींनामाष्टकप्रतिपादनद्वारेणस्तुवन्नाह।२७।भवइति।हेदेव यदेतद्भवान्यद्यभिधानाष्टकंअमुष्मिन्नामाष्टकेश्रुतिर्वेदःप्रत्येकंएकमेकंप्रति।प्रविचरतिवर्त्तते।इतिहेतोःप्रिया यास्मैधाम्नेपूर्वश्लोकप्रतिपादितायतेरूपायभवतेतुभ्यंप्रणिहितनमस्योस्मिकृतनमस्कारोस्मिअथवाहेदेवभ गवतेतवप्रियायास्मैधाम्नेतुरीयतेजसेप्रणिहितनमस्योस्मि।इदानींभगवतःप्रगटरूपतांप्रतिपादयन्नाह २८

नमइति।नेदिष्टायांतिकतमायशिवायनमःनिकटवर्त्तिनेतुभ्यंनमइत्यर्थः।हेप्रियदवप्रियंदबोधनंयस्यसस्तस्य संबुद्धिः।दविष्टायदूरतरायनमशिवायनमःतथाक्षोदिष्टायक्षुद्ररूपायचनमः।हेस्मरहरमहिष्टायचमहत्तरायनमःत थावर्षिष्टायवृद्धतरायनमःहेत्रिनयनयविष्टाययुवनरूपायनमःतथासर्वस्मैनमःअतिसर्वायसर्वमतिक्रांतायतुभ्यं नमःअतिनमस्कारइत्यर्थःइदानींसांख्यपातंजलिप्रक्रियांस्तुवन्नाह २९

बहुलइति।रजोगुणउत्पत्तिहेतुस्तमोगुणनाशहेतुःसत्वगुणोहितेहेतुः।ईश्वरोयदाउत्पत्तिंकरोतितदारजोगुणस्व रूपोभवतियदानाशयतितदातमोगुणयुक्तोभवतियदाहितंकरोतितदासत्वगुणयुक्तोभवतिएतदाश्रित्यहिविश्वो त्पत्तौसृष्टिकर्त्तरिबहुलरजसेऽधिकरजोगुणायनमोनमः।जगदुत्पत्तौभवरूपत्वात्तदनुगुणेनभवशब्देननमस्कारः कृतस्तत्सं

**नमोनेदिष्टायप्रियदवदविष्टायचनमोनमःक्षोदिष्टायस्मरहरमहिष्टायचनमः।नमोवर्षिष्टायत्रिनयनयविष्टायचन मोनमःसर्वस्मैतेतदिदमतिसर्वायचनमः"२९"बहुलरजसेविश्वोत्पत्तौभवायनमोनमःप्रबलतमसेतत्संहारेहराय नमोनमः।जनसुखकृतेसत्वोत्पत्तौमृडायनमोनमःप्रमहसिपदेनिस्त्रैगुण्यैशिवायनमोनमः"३०"**

हारेजगन्नाशनेप्रबलतमसेऽधिकतमोगुणायहरायनमोनमः।संहारस्यनाशरूपत्वात्तदनुगुणेनहरशब्देननम स्कारःकृतःसत्वोत्पत्तौसत्यांजगत्पालनगुणोद्रेकेसतिजनसुखकृतेहितकारायमृडायनमोनमः।मृडसुखइत्य स्यधातोःकर्त्तरिमृडइतिरूपंसत्वगुणस्यसुरूपत्वात्तदनुगुणेनशब्देननमस्कारःकृतःतथाप्रमहसिप्रकृष्टतेजसि निस्त्रैगुण्यैगुणत्रयातीतेपदेस्थानेशिवायनमोनमःयदाकर्त्तुःप्रवृत्तिस्तेनशिवशब्देननमस्कारःकृतःनमोनमइ तिभक्त्यातेत्रवीक्षायांद्विर्वचनं।इदानीमभिप्रेतार्थसिद्धौसत्यांआत्मीयमौत्सुक्यंपरिन्नाह ३०

कृशेति।इदंमदीयंचेतःमानसंक्वकिंभूतंचेतःकृशपरिणतिपरिणामदुर्बलं।तथाक्लेशवश्यं।अविद्यास्मितारागद्वेषाभिनिवेशाःपंचक्लेशास्तेषांवश्यं।विपरितज्ञानमविद्या।अभिन्नयोर्बुद्ध्यात्मनोरेकत्रप्रीतिरस्मिता।सुखेष्वासक्तीरागःदुःखेष्वप्रीतिर्द्वेषः।अननुभूतादपिमरणादेस्त्रासोऽभिनिवेशइतिक्लेशाः।तवऋद्धिर्महिमाक्वकिंभूताऋद्धिः।शश्वत्सर्वदागुणसीमोल्लंघिनीगुणमर्यादामतिक्रांताइत्यनेनप्रकारेणचकितंभीतंमांहेवरदतेतवचरणयोर्भक्तिरमंदीकृत्यभीतिरहितंकृत्वावाक्यपुष्पोपहारमात्रत्वात्।वाक्याण्येवपुष्पाणितेषांपूजातामकल्पयत्“३१”असितगिरिसममि

**कृशपरिणतिचेतःक्लेशवश्यंक्वचेदंक्वचतवगुणसीमोल्लंघिनीशश्वदृद्धिः।इतिचकितममंदीकृत्यमांभक्तिराधाद्वरदचरणयोस्तेवाक्यपुष्पोपहारम्“३१”असितगिरिसमंस्यात्कज्जलंसिन्धुपात्रेसुरतरुवरशाखालेखनीपत्रमुर्व्वी।लिखतियदिगृहीत्वाशारदासर्वकालंतदपितवगुणानामीषपारंनयाति“३२”असुरसुरमुनींद्रैरर्चितस्येंदुमौलेर्ग्रथितगुणमहिम्नोनिर्गुणस्येश्वरस्य।सकलगुणवरिष्टःपुष्पदंताभिधानोरुचिरमलघुवृत्तैस्तोत्रमेतच्चकार“३३”अहरहरनवद्यंधूर्ज्जटेःस्तोत्रमेतत्पठतिपरमभक्त्याशुद्धचित्तःपुमान्यः।सभवतिशिवलोकेरुद्रतुल्यःसदात्माप्रचुरतरधनायुःपुत्रवान्कीर्त्तिमांश्च“३४”** ति।३२ असुरसुरमुनींद्रैरिति।।३३।अहरहरनवद्यमिति ३४

**दीक्षादानंतपस्तीर्थंहोमयागादिकाःक्रियाः।महिम्नस्तवपाठस्यकलांनार्हंतिषोडशीं“३५”समाप्तमैदिदंस्तोत्रंस र्वमीश्वरवर्णनम्।अनूपमंमनोहारिपुण्यंगंधर्वभाषितं“३६”महेशान्नापरोदेवोमहिम्नोनापरास्तुतिः।अघोरान्ना परोमंत्रोनास्तितत्त्वंगुरोःपरं“३७”कुसुमदशननामासर्वगंधर्वराजःशशिधरवरमौलेर्देवदेवस्यदासः।सुगुरुनिजम हिम्नोभ्रष्टएवास्यरोषात्स्तवनमिदमकार्षीद्दिव्यदिव्यंमहिम्नः“३८”सुरवरमुनिपूज्यंस्वर्गमोक्षैकहेतुंपठतिय दिमनुष्यःप्रांजलिर्नान्यचेताः।व्रजतिशिवसमीपंकिन्नरैस्तूयमानःस्तवनमिदममोघंपुष्पदंतप्रणीतम्“३९” श्रीपुष्पदंतमुखपंकजनिर्गतेनस्तोत्रेणकिल्विषहरेणहरप्रियेणकंठस्थितेनपठितेनसमाहितेनसुप्रीणितोभवति भूतपतिर्महेशः“४०”**इतिश्रीपुष्पदंताचार्य्यविरचितंमहिम्नाख्यंस्तोत्रंसमाप्तम्।।

।शंशश्वरद्भवतुपाठकस्येशप्रसादात्।। श्रीः।।

## पञ्चमं प्रकरणम् - "समीक्षितं पाठसम्पादनम्"

महिम्नः पारं ते परमविदुषो यद्यसदृशी
स्तुतिर्ब्रह्मादीनामपि तदवसन्नास्त्वयि गिरः।
अथावाच्यः सर्व्वः स्वमतिपरिणामावधि गृणन्
ममाप्येष स्तोत्रे हर निरपवादः परिकरः।।१।।

श्रीगणेशाय नमः। महिम्नेति। हे हर! हे शम्भो! ते महिम्नः महित्वस्य परं पारमत्यर्थमविदुषोऽवसानमजानतः पुरुषस्य स्तुतिर्यद्यसदृशी तेऽननुरूपा तत्तर्हि ब्रह्मादीनामपि गिरो वाचः त्वयि त्वद्विषये अवसन्नाः कुण्ठिताः। अथ पक्षान्तरेण। सर्वः समस्तः पुरुषः स्वमतिपरिणामावधि यथा भवति तथा गृणन् स्तुवन्नवाच्यः अनिन्द्य इति मतं स्वस्य मतिर्बुद्धिस्तस्याः परिणामः परिकरः अवधिः सीमा यस्मिन्निति क्रियाविशेषणम् एवं चेन्ममापि स्तोत्रे तव स्तुतौ एषः परिकरो यत्नः निरपवादः निर्दोष इति वाक्यार्थः।।१।।

अतीतः पन्थानं तव च महिमा वाङ्मनसयो-
रतद्व्यावृत्त्या यं चकितमभिधत्ते श्रुतिरपि।
स कस्य स्तोतव्यः कतिविधगुणः कस्य विषयः
पदे त्वर्वाचीने पतति न मनः कस्य न वचः।।२।।

हे देव! तव महिमा वाङ्मनसयोः पन्थानं मार्गमतीतः अतिक्रान्तः। वाक्च मनश्च वाङ्मनसे अचतुरेत्यादिसूत्रेण समासान्तो निपातः तयोः। किम्भूतः? यं महिमानं श्रुतिः अपि आम्नायः अपि अतद्व्यावृत्या चकितम् अभिधत्ते। तन्नभवतीत्यतत् अतदो व्यावृत्तिः पर्य्युदासः वर्जनं तेनापि चकितं सभयं यथा स्यात् तथा अभिधत्ते ब्रूते न तु इदं भवतीति निर्दिश्याभिधत्ते। स कस्य स्तोतव्यः केन स्तोतुं शक्यः कस्तुवन्तो यो दोषः कतिविधाः कतिप्रकाराः गुणाः यस्यासौ कतिविधगुणः कियन्तो वा गुणा यस्येति ज्ञातुं न शक्यते। कस्य विषयो गोचरः। अनेन परमार्थस्वरूपज्ञानं कस्यापि नास्तीत्यर्थः स्मृतिपुराणोक्तं स्वरूपं सर्वो जानातीति वक्तुमाह। अर्वाचीने लयसृष्टिस्थितिमुख्यतया प्राण्यनुग्राहके पदे

स्थाने पुनश्चित्तं न पतति न प्रसरति कस्य वचो न पतति अपि तु ममापीति वाक्यार्थः इदानीं महात्म्यस्य स्तोतुम् परिहर्तुमाह।।२।।

मधुस्फीता वाचः परमममृतं निर्मितवत-

स्तव ब्रह्मन् किं वागपि सुरगुरोर्विस्मयपदं।

मम त्वेतां वाणीं गुणकथनपुण्येन भवतः

पुनामीत्यर्थेऽस्मिन् पुरमथन बुद्धिर्व्यवसिता।।३।।

हे ब्रह्मन्! तव सुरगुरोर्बृहस्पतेरपि वाग्वचः विस्मयपदम् आश्चर्यस्थानं भवति किं न भवतीत्यर्थः। किंभूतस्य तव ?वाचः गिरः निर्मितवतो रचयतः। किम्भूता वाचः? मधुस्फीता मधुना माधुर्यगुणेन स्फीताः युक्ताः। पुनः किम्भूता वाचः?परमम् अमृतम् उत्कृष्टम् अमृतम्। अतः स्वरूपत्वात् अमृतम् इति उपचारः अस्मदादेरर्वाक् किं पुनः यद्येवं स्तुतिः किमर्थम् आरभ्यत इत्याह। मम बुद्धिस्तु एतां मदीयां वाणीं तव गुणकथनपुण्येन पुनामीत्यस्मिन्नर्थे व्यवसिता कृतोद्यमा। आत्मस्तुतेः सावकाशत्वं प्रतिपाद्य इदानीं मीमांसकाः ईश्वरो नास्तीति वदन्ति तन्निराकर्तुमाह।।३।।

तवैश्वर्य्यं यत्तज्जगदुदयरक्षाप्रलयकृत्

त्रयीवस्तुव्यस्तं तिसृषु गुणभिन्नासु तनुषु।

अभव्यानामस्मिन् वरद रमणीयामरमणीं

विहन्तुं व्याक्रोशीं विदधत इहैके जडधियः।।४।।

तवैश्वर्येति। हे वरद! तव यदैश्वर्यं तज्जगदुदयरक्षाप्रलयकृत्। जगतां लोकानाम् उदयः उत्पत्तिः रक्षा परिपालनं प्रलयो विनाशश्चेति द्वन्द्वः तान् करोति तत्कृत्। किम्भूतं त्रय्येव वेदत्रयं वस्तु प्रतिपाद्यं तथा तिसृषु तनुषु मूर्त्तिषु व्यस्तं विभज्य निक्षिप्तम्। किम्भूतासु तनुषु। गुणभिन्नासु गुणैः सत्वरजस्तमोभिर्भिन्नासु पृथग्भूतासु ब्रह्मविष्णुशिवात्मकासु। इह लोके। केचिज्जडधियो मन्दबुद्धयः अस्मिन्नैश्वर्ये व्याक्रोशीं निन्दां विदधते कुर्वते तद्विहन्तुं विनाशयितुम्। किम्भूतां व्याक्रोशीम्। अभव्यानामसत्पुण्यभाजां रमणीयां रम्याम्। पुनः किम्भूतां व्याक्रोशीम्। परमार्थतस्तु अरमणीमशुभाम् एतामियं व्याक्रोशीं प्रकटयन्नाह।।४।। ।।श्रीः।।

किमीहः किंकायः स खलु किमुपायस्त्रिभुवनं

किमाधारो धाता सृजति किमुपादान इति च।

अतर्क्यैश्वर्य्ये त्वय्यनवसरदुःस्थो हतधियः

कुतर्कोऽयं कांश्चिन् मुखरयति मोहाय जगतः।।५।।

तिसृषु गुणभिन्नासु तनुषु तवैश्वर्यं व्यस्तमिन्यनेन धातृरूपेण सृजति विष्णुरूपेण पालयति रूद्ररूपेण संहरतीत्युक्तं तद्दूषयन्नाह। ईश्वरो धाता भूत्वा ब्रह्मरूपेण त्रिभुवनं सृजन् किमीहः सन् सृजति। का ईहा चेष्टा व्यापारो यस्य स तथोक्तः किमाधारः सन् सृजति कः आधारोऽधिकरणं यस्य स कुत्र स्थित्वा सृजतीत्यर्थः किमुपादानः सृजति निर्मिमीते। कार्यं यत्र समवेति तदुपादानकारणं यथा घटस्य मृत्पिण्ड उपादानकारणं पटस्य तन्तवस्तद्वदत्र लोकनिर्माणे धातुरुपादानकारणं विना कार्यं न सिध्यतीति भावः इत्यनेन प्रकारेणायं कुतर्कः जगतो जनस्य मोहाय मोहमुत्पादयितुं कांश्चित् पुरुषान् मुखरयति वाचालयति। कुतर्को दुरूहः किम्भूतान् हतधियो दुर्बुद्धीन्। किम्भूतः कुतर्कः। त्वय्यनवसरदुःस्थः अवसरोऽवकाशः नावसरो न वसरस्तेन दुःस्थः दुर्बलस्तुच्छ इत्यर्थः त्वयि विषये तस्यानवसर एव किम्भूते त्वयि। अतर्क्यैश्वर्य्येऽतर्क्यम् अनूह्यम् ऐश्वर्यं यस्य तस्मिन्।।५।।

अजन्मानो लोकाः किमवयववन्तोऽपि जगता-

मधिष्ठातारं किं भवविधिरनादृत्य भवति।

अनीशो वा कुर्याद् भुवनजनने कः परिकरो

यतो मन्दास्त्वां प्रत्यमरवर संशेरत इमे।।६।।

हेऽमरवर! देवश्रेष्ठ! भूधराद्यवयववन्तोऽपि लोकाः अजन्मानः किं जन्मरहिताः किं न विद्यते जन्म उद्भवो येषां तेऽजन्मानः किम् शब्दः आक्षेपे। योऽवयववान् सोऽजन्मेति नोपपद्यते तथापि सावयवो घटः उत्पत्तिमान(न्) एव दृश्यते भवतु सावयवः उत्पत्तिमान् एतावता किं लभ्यत इत्याह। जन्मवतां लोकानां भवविधिरुत्पत्तिविधिरधिष्ठातारमुत्पादकं कत्ता(र्ता)रमनादृत्यमनपेक्ष्य भवति किं यतो यस्मात् कारणादिमे मन्दाः स्वल्पबुद्धयो मीमांसकादयस्त्वां प्रति मु(उ)द्दिश्य संशेरते संशयं कुर्वन्ति अतस्त्वां प्रति सन्देहो न कर्तव्य इत्यभिप्रायः। एतावत्युक्ते किं पुनः पूर्वपक्षे भवतु अधिष्ठाता एतावता

कथमीश्वरसिद्धिरिति। अनीश्वर ईश्वरादन्योऽपि कुर्यादेतदपि धर्षयति भुवनजनने लोकोत्पादने कः परिकरः कः समर्थः ईश्वरं विना नान्यः समर्थ इत्यर्थः।।६।।

त्रयी सांख्यं योगः पशुपतिमतं वैष्णवमिति
प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च।
रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषां
नृणामेको गम्यस्त्वमसि पयसामर्णव इव।।७।।

त्रयाणां वेदानां समाहारस्त्रयी वेदविहितो मार्गः एको मार्गः। साङ्ख्यं योगः योगशास्त्रं वैशेषिकशास्त्रं वाशिष्ठादि कापिलं शास्त्रं पञ्चविंशतिः। शास्त्रं वशिष्ठादि स एको मार्गः पाशुपतमतां वाऽगमः मतशब्देन सिद्धान्ताः प्रकीर्तिताः सिमसिद्धान्तः शिवसिद्धान्तः पञ्चरात्रसिद्धान्त इत्यादयः सिद्धान्ताः तथा वैष्णवमिति केशवपञ्चरात्रयोर्ग्रहणम् एतत् पञ्चसङ्ख्यापरिच्छिन्नं प्रस्थानं तत् प्रस्थाने प्रभिन्ने नानात्वं गते सति। प्रस्थीयते गम्यतेऽनेनेति प्रस्थानं मार्गः। यत इदं परं तत्त्वम् अदः परं पथ्यं सेव्यं ग्राह्यं च। कस्मात्। रुचीनां वैचित्र्यात्। अतो रुचयो विचित्राः। यत् उक्तम्-

एक एव परं तत्त्वमभिन्नं परमार्थतः।
तदेव रुचिवैचित्र्यान्नानात्वं समुपागतम्।१।

ऋजुकुटिलनानापथजुषां केचिन्मार्गाः ऋजवः प्राञ्जलाः केचिन्मार्गाः वक्रा इति अनेकमार्गः सेविनां नृणां त्वमेको गम्यं(यः) प्राप्योऽसि। येन केन वा मार्गेण गच्छतां त्वमेव प्राप्य इत्यर्थः। पयसामर्णवो यथा ऋजुकुटिलमार्गेण गच्छतां जलानां समुद्र एव प्राप्यस्तथा त्वमित्यर्थः।।७।।

महोक्षः खट्वाङ्गं परशुरजिनं भस्मफणिनः
कपालं चेतीयत्तव वरद तन्त्रोपकरणम्।
सुरास्तां तामृद्धिं दधति तु भवद्भ्रूप्रणिहितां
न हि स्वात्मारामं विषयमृगतृष्णा भ्रमयति।।८।।

महोक्षेति। महांश्चासौ उक्षा च महोक्षः महद्बलीवर्द्दः महोक्ष इति अचतुरादिसूत्रेण निपातः। खट्वाङ्गं प्रसिद्धम् एतत्। अथ खण्डस्योपरि ब्रह्मकपालं खट्वाङ्गम् उच्यते। परशुः कुठारः। अजिनं

मृगचर्म्म। भस्म दग्धमयि। फणिनः सर्पाः। कपालं शिरोस्थिकरोटी च इति शब्दसमाप्तौ वर्तते। इयदेतावदेव। हे वरद! अभयद! तव तन्त्रोपकरणम् उपक्रियते अनेनेति उपकरणम् उपकार इत्यर्थः। तन्त्ररूपेण प्रपञ्चरूपेण स्थितम् उपकरणम् एतावदेव। सुरास्तु पुन इन्द्रादयस्तां तामृद्धिं सम्पदां दधति धारयन्ति। किम्भूताम् ऋद्धिम्। भवद्भ्रूप्रणिहिताम्। भवतः तव भ्रूक्षेपमात्रेणोपनीतां दत्ताम् इत्यर्थः। यद्येवम् एतावती शक्तिः अस्ति तर्हि भगवान् स्वयं कस्मान्नोपभुङ्क्त इत्याह। न हीत्यादि स्वात्मनि स्वकीये आत्मनि आरमति क्रीडयति स्वात्मारामं भगवन्तं परमयोगिनं न भ्रमयति न चालयति एतेन भगवतः परमयोगित्वं प्रकटितम् इन्द्रियगोप्यमित्यर्थः।।८।। श्रीः।।

ध्रुवं कश्चित्सर्वं सकलमपरस्त्वध्रुवमिदं
परो ध्रौव्याध्रौव्ये जगति गदति व्यस्तविषये।
समस्तेऽप्येतस्मिन् पुरमथन तैर्विस्मित इव
स्तुवन् जिह्रेमि त्वां न खलु ननु धृष्टा मुखरता।।९।।

ध्रुवमिति। हे पुरमथन! त्रिपुरदाहक! कश्चिद् भद्दमतदर्शनानुयायी सर्वमिदं जगद् ध्रुवं नित्यं गदति न कदाचिदनीश्वरं जगदिदमिति ब्रवीति अपरोऽन्यः क्षपणो बौद्धस्तु अध्रुवम् अनित्यं वदति। अन्यस्तार्किको वीतरागी माध्यस्थम् अवलम्बमान एतस्मिन् समस्ते जगति ध्रौव्याध्रौव्ये नित्यानित्ये व्यस्तविषये सति विक्षिप्तप्रमाणभूमौ सत्यां वदति। आकाशादिकं नित्यं घटपटादिकमनित्यं ब्रूत इत्यर्थः। एवं नानाप्रकारेण वदद्भिस्तैर्विस्मितोपहसितो व्याकुलित इवाहं त्वां स्तुवन् सन् जिह्रेमि लज्जे। तर्हि स्तुतौ कथं प्रवर्त्तसे इत्यत्राह। मुखरता वाचालता चपलता ननु न धृष्टा अपि धृष्टा एव इत्यर्थः इदानीं पुराणप्रसिद्धं ब्रह्मविष्णु अपरं लि(ङ्)गोद्भवं स्तुवन्नाह।।९।।

तवैश्वर्यं यत्नाद्यदुपरि विरिञ्च्यो(ञ्चिर्) हरिरधः
परिच्छेत्तुं यातावनलमनलस्कन्धवपुषः।
ततो भक्तिश्रद्धाभरगुरुगृणद्भ्यां गिरिश यत्
स्वयं तस्थे ताभ्यां तव किमनुवृत्तिर्न फलति।।१०।।

तवैश्वर्यमिति। हे गिरिश! शङ्कर! तव यदैश्वर्यं महात्म्यं यत्नान् महता प्रयत्नेन परिच्छेतुम् एतावदिति परकलयितुम् उपरि विरिञ्चिर्ब्रह्मा यातः अधः पातालं हरिर्यातः द्वावप्यनलं यातौ अशक्तौ जातौ। किम्भूतस्य तव। अनलस्कन्धवपुषः अनलस्कन्धोऽग्निसमूहः वपुः शरीरं तस्य एतेन किमुक्तं वायुतत्त्वपर्यन्तं लिङ्गस्य मस्तकं कालाग्निपर्यन्तं लिङ्गस्य मूलं ब्रह्मणो ब्रह्माण्डव्याप्तिः विष्णुर्भगवानत एतत्त्वनिवासी। क्वचिदनिलस्कन्धवपुष इति पाठस्तत्र च वपुषः शरीरस्य ततः पश्चाद्भक्तिश्रद्धाभरगुरुगृणद्भ्यां स्तुवद्भ्यां ब्रह्मविष्णुभ्यां तवैश्वर्यं स्वयमेव तस्थे स्वेनैव प्रकाशितमित्यर्थः। प्रकाशनस्थेयाख्ययोश्चेति तिष्ठतेरात्मनेपदम्। यथा { भाद्राशपतिष्ठत तिष्यते कन्यति ? }ताभ्याम् इति तादर्थे चतुर्थी। हे देव! तवानुवृत्तिः सेवा किं न फलति किं न प्रयच्छति सर्वमपि फलतीत्यर्थः इदानीं तदेव दृढयितुमाह ।।१०।।

अयत्नादापाद्य त्रिभुवनमवैरिव्यतिकरं

दशास्यो यद्बाहूनभृत रणकण्डूपरवशान्।

शिरःपद्मश्रेणीरचितचरणाम्भोरुहबलेः

स्थिरायास्त्वद्भक्तेस्त्रिपुरहर विस्फूर्ज्जितमिदम्।।११।।

हे त्रिपुरहर! दशास्यो रावणः अयत्नादनायासेन त्रिभुवनं त्रैलोक्यम् आपाद्य अवैरिव्यतिकरं सत्वसम्पर्क्करहितं निःकण्टकं कृत्वा रणकण्डूपरवशान् रणे या कण्डू खर्ज्जु तया परवशान् तदधीनान् युद्धलम्पटानित्यर्थः। बाहून् यदभृत अधृत तदिदं स्थिराया अचलायास्तव भक्तेर्विस्फूर्ज्जितं विस्फारणं विजृम्भणम्। किम्भूताया भक्तेः। शिरांस्येव पद्मानि तेषां श्रेणी पंक्तिस्तया रचिता आरोपिता चरणाम्भोरुहाणां बलिः पूजोपहारिः सा शिरःपद्मश्रेणीरचितचरणाम्भोरुहबलिस्तस्यास्त्वद्भक्तेः फलं निरूपितम्। इदानीं त्वयि तिरस्कारफलं निरूपयितुमाह।।११।।

अमुष्य त्वत्सेवासमधिगतसारं भुजवनं

बलात् कैलाशेऽपि त्वदधिवसतौ विक्रमयतः।

अलभ्या पातालेऽप्यलसचलिताङ्गुष्ठशिरसि

प्रतिष्ठा त्वय्यासीद् ध्रुवमुपचितो मुह्यति खलः।।१२।।

अमुष्येति। हे हर! अमुष्य रावणस्य पाताले रसातलेऽपि प्रतिष्ठा स्थितिरलभ्या अप्राप्या दुर्ल्लभा आसीत्। किम्भूतस्य अमुष्य। भुजवनं बाहुसमुहं बलात्त्वदधिवसतौ तव निवासस्थाने कैलाशेऽपि विक्रमयतः पराक्रमयतः। किम्भूतं भुजवनम्। त्वत्सेवासमधिगतसारम्। त्वत्सेवया भवदाराधनेन समधिगतः प्राप्तः सारो बलो(लं) येन तत्तथोक्तम्। क्व सति। अलसचलिताङ्गुष्ठशिरसि। अलसेनानायासेना प्रयत्नेन चलितमधः कृतमङ्गुष्ठशिरो येन स अलसचलिताङ्गुष्ठशिरस्तस्मिन् सति त्वयि अहो! युक्तमेतत्। ध्रुवं निश्चितम् उपचितः समृद्धः वृद्धिं गतः सन् खलो दुर्ज्जनो मुह्यति मोहमुपयाति। इदानीं बाणासुरानुग्राहिणं भगवन्तं स्तुवन्नाह।।१२।।

यदृद्धिं सुत्राम्णो वरद परमोच्चैरपि सती-

मधश्चक्रे बाणः परिजनविधेयत्रिभुवनः।

न तच्चित्रं तस्मिन् वरिवसितरि त्वच्चरणयो-

र्न कस्याप्युन्नत्यै भवति शिरसस्त्वय्यवनतिः।।१३।।

यदिति। बाणो बाणासुरः सुत्राम्णो वासवस्य ऋद्धिं सम्पदां यदधश्चक्रे तिरश्चकार। किम्भूतामृद्धिम्। परमोच्चैः परमोन्नतामित्यर्थः। किम्भूतां सतीम्। अत्यन्तमहतीम्। किम्भूतो बाणः। परिजनविधेयत्रिभुवनः। परिजनसेवकस्येव विधेयं वश्यं त्रिभुवनं यस्य स तथोक्तः। तस्मिन् बाणे तन्न चित्रं नाश्चर्य्यमस्ति। किम्भूते बाणे। त्वच्चरणयोर्वरिवसितरि शुश्रूषके पूजयितरि। कथमित्याह। त्वयि शिरसा कृत्वा अवनतिर्नम्रता कस्याप्युन्नत्यै न भवति अपितु सर्वेषामेव भवतीति तात्पर्यार्थः। साम्प्रतं कालकूटविषापहरणप्रतिपादनद्वारेण भगवन्तं स्तुवन्नाह।।१३।।

अकाण्डब्रह्माण्डक्षयचकितदेवासुरकृपा-

विधेयस्यासीद्यस्त्रिनयन विषं संहृतवतः।

स कल्माषः कण्ठे तव न कुरुते न श्रियमहो

विकारोऽपि श्लाघ्यो भुवनभयभङ्गव्यसनिनः।।१४।।

अकाण्डेति। हे त्रिनयन! विषं कालकूटं संहृतवतः गिलितवतः तव कण्ठे गले यः कल्माषः कालिमा आसीत् सञ्जातः स श्रियं शोभां न कुरुते इति न कुरुते एव। अहो! आश्चर्यम्। किंविधस्य

ते। अकाण्डब्रह्माण्डक्षयचकितदेवासुरकृपाविधेयस्य। अकाण्डेऽसमयेऽकाले ब्रह्माण्डस्य क्षयो विनाशस्तस्माच्चकिता भीता ये देवासुरास्तेषु कृपा दया तस्या विधेयस्य वश्यस्य कृपापरायणस्य इत्यर्थः। ननु कथं शुद्धस्फटिकसङ्काशनीलत्वलक्षणो विकारः शोभां कुरुत इत्याह। विकार इति। भुवनभयभङ्गव्यसनिनः भुवनानां लोकानां भयस्य भङ्गे दूरीकरणे व्यसनिनः परोपकारप्रवृत्तस्य पुरुषस्य प्रकारान्तरप्राप्तिः श्लाघ्या शंसनीया इत्यर्थः इदानीं कामनिग्रहपरां स्तुतिमाह।।१४।।

असिद्धार्था नैव क्वचिदपि सदेवासुरनरे

निवर्त्तन्ते नित्यं जगति जयिनो यस्य विशिखाः।

स पश्यन्नीश त्वामितरसुरसाधारणमभूत्

स्मरः स्मर्त्तव्यात्मा न हि वशिषु पथ्यः परिभवः।।१५।।

असिद्धार्था इति। यस्य स्मरस्य विशिखा बाणाः जगति लोके क्वचिदपि कदाचिदप्यसिद्धार्थाः अकृतप्रयोजनाः नैव निवर्त्तन्ते किन्तु नित्यं सर्वथा कृतप्रयोजना भवन्तीत्यर्थः। किम्भूतस्य तव। जयिनः जितवतः। किम्भूते जगति। सदेवासुरनरे। देवाश्चासुराश्च नराश्च देवासुरनरास्तैः सह वर्त्तत इति सदेवासुरनरं तस्मिन् स्वर्गमृत्युपातालेऽपीत्यर्थः। हे ईश! स स्मरस्त्वाम् इतरसुरसाधारणमन्यदेवतुल्यं पश्यन् सन् स्मर्त्तव्यात्मा स्मरणीयो भूतनष्टशरीरोऽभवदित्यर्थः। अत्रोक्ते वशिष्टात्मेश्वरेषु परिभवोऽवज्ञा न पथ्यः सुखकारी न भवतीत्यर्थः। अतिबलवान् कश्चन राक्षसः संध्यासमये इदं जगत् क्षयमुत्पद्यते तन्निवारणार्थं तस्मिन् काले भगवान् ताण्डवं करोति। साम्प्रति ताण्डवसबन्धस्तुतिं कर्त्तुमाह ।।१५।।

मही पादाघाताद् व्रजति सहसा संशयपदं

पदं विष्णोर्भ्राम्यद्भुजपरिघरुग्णग्रहगणम्।

मुहुर्द्यौर्दौस्थ्यं यात्यनिभृतजटाताडिततटा

जगद्रक्षायै त्वं नटसि ननु वामैव विभुता।।१६।।

महीति। हे देव! जगद्रक्षायै लोकत्राणाय त्वं नटसि नृत्यसि ताण्डवं करोषि ननु भो! तव विभुता महत्त्वं वामैव विपरीतैव। कथमित्याह। मही पृथ्वी पादाघातात् पादताडनात् सहसा शीघ्रं संशयपदं व्रजति याति अस्ति नास्ति इति सहसा किं {त्रुट्यति?}किं अधः प्रविशतीति संशयपदं गच्छतीत्यर्थः।

तथा विष्णोः पदमाकाशमीदृशं जातम्। भ्राम्यद्भुजपरिघरुग्णग्रहगणम्। भ्राम्यन्तः इतस्ततश्चलन्तश्च ते भुजाश्च ते एव परिघाः अर्गलास्तै रुग्णाः भग्नाः ग्रहाणां गणाः समूहा यस्मिन् तत्तथोक्तम्। अन्यच्च वैपरीत्यं द्यौः स्वर्गः मुहुर्दौस्थ्यं दुस्तरत्वं याति। किम्भूता द्यौः। अनिभृतजटाताडिततटा। अनिभृताभिरनिश्चलाभिर्जटाभिस्ताडितं तटं यस्याः सा तथोक्ता। पूर्वमगस्त(स्त्य)मुनिना हस्तपात्रीकृतो जलधिस्तेन पुनः पुनः परमेश्वरेण देवाभ्यर्थितेन भगवता गङ्गाजलैः पूरितः इत्येतत्प्रबन्धस्तुतिकर्तुमाह।।१६।।

वियद्व्यापी तारागणगुणितफेनोद्गमरुचिः
प्रवाहो वारां यः पृषतलघुदृष्टः शिरसि ते।
जगद्वीपाकारं जलधिवलयं तेन कृतमि-
त्यनेनैवोन्नेयं धृतमहिमदिव्यं तव वपुः।।१७।।

वियदिति। हे देव! वारां पयसां यः प्रवाहस्तव शिरसि जटामुकुटे पृषतवल्लघु सूक्ष्मं यथा स्यात्तथा दृष्टः। किम्भूतः प्रवाहः। वियद्व्यापी। वियदाकाशं व्याप्तुं शीलं यस्य सः। पुनः स किंविधः। तारागणगुणितफेनोद्गमरुचिः। ताराणां नक्षत्राणां गणः समूहस्तेन गुणित उद्भावितः शङ्कितः फेनोद्गमडिण्डीरोत्पत्ते रुचिः शोभा यस्य स तथोक्तः। तेन प्रवाहेण जगद्वीपाकारं जलमध्यस्थितमभूत्। खण्डो द्वीपस्तद्रूपमकारि। किम्भूतं जगत्। जलधिवलयम्। जलधिः समुद्रो वलयं परिखं यस्य स तथोक्तः। अनेनैव हेतुना तत्र दिव्यं सदानन्दात्मकं वपुः शरीरं हे धृतमहिमेत्युन्नेयमूहनीयम्। धृतोऽद्भुतमहिमा सर्वज्ञत्वं सर्वकर्तृत्वं येन वपुषा तथोक्तः। साम्प्रति पुरदहनाडम्बरविषयां स्तुतिमाह।।१७।।

रथः क्षोणी यन्ता शतधृतिरगेन्द्रो धनुरथो
रथाङ्गे चन्द्रार्कौ रथचरणपाणिः शर इति।
दिधक्षोस्ते कोऽयं त्रिपुरतृणमाडम्बरविधि-
र्विधेयैः क्रीडन्त्यो न खलु परतन्त्राः[33] प्रभुधियः।।१८।।

---

[33] 'स्वाधीना इत्यर्थः' इति पदव्याख्या अस्य पदस्य उपरि दर्शिता।

रथ इति। हे देव! त्रिपुरतृणं दिधक्षोः दग्धुमिच्छोस्ते कोऽयमाडम्बरविधिः कोऽयं सम्भ्रमः किमर्थमिति यावत्। तमेवाडम्बरं दर्शयन्नाह। रथः क्षोणी भूमिः। यन्ता सारथी शतधृतिर्ब्रह्मा। अगेन्द्रो हिमवान् धनुः चापम्। अथोऽनन्तरं रथाङ्गे चक्रे चन्द्रार्कौ सोमसूर्यौ। रथचरणपाणिर्विष्णुः शरो बाणः। इतिशब्दः प्रकारवचनेऽथवा युक्तमेवैतत् प्रभुधियः स्वामिनां बुद्धयः परतन्त्रा न खलु फलप्रधाना न भवन्ति। यावता फलं सिध्यति तावदेव सम्पादयन्तीत्यर्थः किंविधाः प्रभुधियः। विधेयैर्भृत्यजनैः क्रीडन्त्यो विनोदयन्त्यः। त्रिपुरमेव तृणं तृ(त्रि)पुरतृणम्। इदानीं हरिश्चक्रलाभाय ईश्वरपादयोः कमलसहस्रपूजां कृतवानिति प्रबद्धां स्तुतिमाह ।।१८।।

हरिस्ते साहस्रं कमलबलिमाधाय पदयो-

र्यदेकोने तस्मिन्निजमुदहरन्नेत्र कमलम्।

गतो भक्त्युद्रेकः परिणतिमसौ चक्रवपुषा

त्रयाणां रक्षायै त्रिपुरहर जागर्त्ति जगताम्।।१९।।

हे त्रिपुरहर! हरिः श्रीकृष्णस्ते तव पदयोः साहस्रं सहस्रसङ्ख्योपेतं कमलबलिं पद्मपूजामाधाय निक्षिप्य तस्मिन् बलौ एकेन कमलेन ऊने हीने सति निजम् आत्मनीयं नेत्रकमलम् उदहरन्नुत्पाटितवान्। असौ भक्त्युद्रेकः भक्त्यातिशयं नेत्रकमलं चक्रवपुषा चक्ररूपेण परिणतिं परिणामं गतः प्राप्तः सन् त्रयाणां जगतां स्वर्गमृत्युपातालानां रक्षायै त्राणाय जागर्त्ति बुध्यति स्फुरति अप्रमत्तस्तिष्ठतीत्यर्थः। इदानीं मीमांसवादीयो वेदस्य नित्यतां मन्यमानः न कदाचिदनीदृशं जगदिदमिति प्रतिपाद्य भगवतो जगत्कर्तृत्वं प्रतिपाद्य ते तन्मतनिराकरणद्वारेण देवं स्तोतुमाह।।१९।।

क्रतौ सुप्ते जाग्रत्त्वमसि फलयोगे क्रतुमतां

क्व कर्म प्रध्वस्तं फलति पुरुषाराधनमृते।

अतस्त्वां संप्रेक्ष्य क्रतुषु फलदानप्रतिभुवं

श्रुतौ श्रद्धां बद्ध्वा दृढपरिकरः कर्मसु जनः।।२०।।

क्रताविति। हे देव! क्रतौ यागे क्रियात्मकत्वेनोपपत्ति प्रध्वंसितत्वान्नष्टत्वं चास्ति। क्रतौ सुप्ते विनष्टे सति क्रतुमतां यज्वनां फलयोगे स्वर्गादिफलसम्बन्धे त्वं जाग्रदसि फलं दातुं सावधानोऽसि।

कथमेतदित्याह। प्रध्वस्तं विनष्टं कर्म क्रियापुरुषाराधनम् ऋते ईश्वराराधनं विना क्व फलति कुत्रापि नेत्यर्थः। अतः कारणाज्जनो लोकः क्रतुषु फलदानप्रतिभुवं फलदातारं त्वां सम्प्रेक्ष्य श्रुतौ वेदवाक्ये श्रद्धां बद्ध्वा विश्वासं कृत्वा फलयोगे दृढपरिकरः कृतयत्नः। इदानीं पूर्वश्लोकसम्बन्धार्थमेव दक्षयागभ्रंशदृष्टान्तेन दृढीकुर्व्वन्नाह।।२०।।

क्रियादक्षो दक्षः क्रतुपतिरधीशस्तनुभृता-

मृषीणामार्त्विज्यं शरणद सदस्याः सुरगणाः।

क्रतुभ्रंशस्त्वत्तः क्रतुफल विधानव्यसनिनो

ध्रुवं कर्तुः श्रद्धाविधुरमभिचाराय हि मखाः।।२१।।

हे शरणद! क्रियादक्षः क्रियासंयोगे दक्षकुशलः दक्षो दक्षप्रजापतिर्यय(ज)मानः किम्भूतस्तनुभृतां शरीरिणाम् अधीशोऽधिपतिः ऋषीणाम् आर्त्विज्यम् ऋषयो वशिष्ठादय इत्यर्थः। सदस्या इन्द्रादय एव सदसि स्थिताः एवंविधा सामग्री कस्यापि दक्षस्य त्वत्तो भवतः सकाशात् क्रतुभ्रंशोऽभूत् किम्भूतस्य त्वत्तः क्रतुफलविधानव्यसनिनः क्रतोः फलस्य विधाने सम्पादने व्यसनिनः उत्सुकात्। एतदुक्तं भवति त्वयि भक्तिहीनत्वाद्दक्षस्य ईप्सिता फलप्राप्तिर्न सञ्जाता। युक्तमेतत्। ध्रुवं निश्चितं श्रद्धाविधुरं विश्वासरहितं यथा स्यात्तथा कर्तुः कुर्वतः पुरुषस्य मखा यागा अभिचारायानर्थाय भवन्ति सम्प्रति ब्रा(ब्र)ह्मणः दुहित्राभिलाषुकस्य निग्रहसामर्थ्यमैश्वर्यं स्तुवन्नाह।।२१।।

प्रजानाथं नाथ प्रसभमभिकं स्वां दुहितरं

गतं रोहिद्भूतां रिरमयिषुमृष्यस्य वपुषा।

धनुष्पाणेर्यातं दिवमपि सपत्राकृतममुं

त्रसन्तं तेऽद्यापि त्यजति न मृगव्याधरभसः।।२२।।

प्रजानाथमिति। हे नाथ! स्वामिन्! धनुष्पाणेस्ते तव मृगव्याधरभसः मृगयुवेग आखेटकोत्साहः अमुं प्रजानाथं ब्रह्माणमद्यापिनत्यजति किम्भूतं प्रजानाथं प्रसभमत्यर्थमभिकं कामुकम्। अत एव स्वां दुहितरं स्वसुताम् ऋष्यस्य वपुषा मृगशरीरेण गतं किं कर्त्तुमिच्छन्तं रिरमयिषुरमयितुमिच्छन्तम्। किम्भूतां दुहितरम्। रोहिद्भूतां मृगयीभूतामित्यर्थः पुनः किम्भूतं प्रजानाथं त्रसन्तं भीतम् अत एव

दिवमाकाशं यातम्। पुनः किंविधं सपत्राकृतं बाणेन विद्धं बाणाघातमित्यर्थः ब्रह्मा अतिकाम(मु)कत्वेन मृगीभूत्वा स्वसुतां मृगरूपेण { गन्तु? } गतः अतः अधर्माणमेनं शरेण हन्तुमीश्वरो मृगयुर्भूत्वाऽनुघातीत्यर्थः इदानीमपि गगने दृश्यते साम्प्रतं गौरीरूपाभिमर्दनपुरस्सरं भगवतः परम योगित्वं स्तोतुमाह ।।२२।।

स्वलावण्याशंसा धृतधनुषमह्नाय तृणवत्
पुरः प्लुष्टं दृष्ट्वा पुरमथन पुष्पायुधमपि।
यदि स्त्रैणं देवी यमनिरत देहार्द्धघटना-
दवैति त्वामद्धा बत वरद मुग्धा युवतयः ।।२३।।

हे पुरमथन! अह्नाय शीघ्रं तृणवत्तृणमिव प्लुष्टं दग्धं धृतधनुषं पुष्पायुधं मदनं पुरोऽग्रतो दृष्ट्वापि देवी गौरी यमनिरतदेहार्धघटनाद्योजनात्त्वां यदि स्त्रैण्यं स्त्रीपरतन्त्रं स्त्रीलम्पटमवैति स्त्रीवशं जानातीति चेत् हे वरद! अद्धा निश्चितं युवतयः स्त्रियः मुग्धाः मूर्खाः बत अहो! किम्भूता गौरी स्वलावण्याशंसा स्वमात्मसौन्दर्यं कीर्तयन्ती स्वरूपाभिमानिनीत्यर्थः। यमेन निरतं तत्परं यद्देहार्द्धं तस्य घटनासम्पादनादित्यर्थः। साम्प्रतमिच्छावर्णनप्रकारपुरःसरं स्तोतुमाह।।23।।

स्मशानेष्वाक्रीडा स्मरहर पिशाचाः सहचरा-
श्चिताभस्मालेपः स्रगपि नृकरोटीपरिकरः।
अमङ्गल्यं शीलं तव भवतु नामैवमखिलं
तथापि स्मर्तॄणां वरद परमं मङ्गलमसि।।२४।।

श्मसानेष्विति। हे स्मरहर! ते स्मशानेषु पितृवनेषु आक्रीडा विहरणं तव पिशाचा वैतालाः सहचराः सहवासिनः तथा आलेपोऽनुलेपनं चिताभस्म मृतशरीरदहनार्थोचितकाष्टनिचयश्चिता तन्मयं भासितं तव स्रगपि नृकरोटीपरिकरः नरकपालसमूहः एवमनेन प्रकारेण हे वरद! तवाखिलं शीलं स्वभावममङ्गल्यमशुभं भवतु नाम तथापि स्मर्तॄणां चिन्तयतां परममुत्कृष्टं मङ्गलमसि। इदानीं भगवतः परमतत्त्वं निरूपणद्वारेण स्तुवन्नाह।।२४।।

मनः प्रत्यक्चित्ते सविधमवधायात्तमरुतः
प्रहृष्यद्रोमाणः प्रमदसलिलोत्सङ्गितदृशः।
यदा लोक्याह्लादं ह्रद इव निमज्ज्यामृतये
दधत्यन्तस्तत्त्वं किमपि यमिनस्तत्किलभवान्।।२५।।

हे देव! यमिनो योगिनः किमपि तत्त्वमालोक्य सच्चिदानन्दरूपं किमप्यनाख्येयरूपं प्रत्यक्षगोचरं वस्तु दृष्ट्वा आह्लादं सुखं दधति धारयन्ति किं कृत्वा इव अमृतमयेऽमृतस्वरूपे ह्रदे जलाशये निमज्येव किल इति सत्ये तत्तत्त्वं भवान् त्वमेव। किम् शब्दः प्रसिद्धौ। किं कृत्वा। प्रत्यग्विषयेभ्यो निवर्तचित्ते आत्मनि मनोऽन्तःकरणं सविधं सप्रकारं योगशास्त्रे यथा स्यात्तथा अवधायावस्थाप्य। किम्भूता यमिनः। आत्तमरुतः आत्ता गृहीता निरुद्धा मरुत्प्राणाद्यवयवा यैस्तथोक्ताः पुनः किम्भूताः। प्रहृष्यद्रोमाणः प्रहृष्यन्ति पुलकितानि रोमाणि येषां ते तथोक्ताः। पुनः किम्भूताः। प्रमदसलिलोत्सङ्गितदृशः। प्रमदसलिलैरानन्दबाष्पैरुत्सङ्गिताः परिप्लुता दृशो नेत्राणि येषां ते। साम्प्रतमष्टमूर्त्तिद्वारेण भगवन्तं स्तुवन्नाह ।।२५।।

त्वमर्कस्त्वं सोमस्त्वमसि पवनस्त्वं हुतवह-
स्त्वमापस्त्वं व्योम त्वमु धरणिरात्मा त्वमिति च।
परिच्छिन्नामेवं त्वयि परिणता बिभ्रतु गिरं
न विद्मस्तत्तत्त्वं वयमिह हि यत्त्वं न भवसि।।२६।।

त्वमिति। हे देव! त्वमर्कः सूर्योऽसि सोमश्चंद्रोऽसि त्वं पवनो वायुरसि हुतवहोऽग्निरग्निरसि आपस्त्वमुदकमसि व्योम आकाशोऽसि धरणिर्भूमिरसि आत्मा परमात्मासि एवमनेन प्रकारेण परिच्छिन्नासि यत्तया आविष्टां गिरं वाणीं त्वयि परिणताः पक्वबुद्धयस्त्वत्स्वरूपविदस्त्वयि बिभ्रतु दधतु वयं तु इह लोके यत्त्वं न भवसि तत्तत्त्वं तत्तद्वस्तु न विद्मः न जानीमः इदानीं प्रणवप्रतिपाद्यत्वेन भगवन्तं स्तुवन्नाह ।।२६।।

त्रयीं तिस्रो वृत्तीस्त्रिभुवनमथो त्रीनपि सुरा-
नकाराद्यैर्वर्णैस्त्रिभिरभिदधत्तीर्णविकृति।

तुरीयं ते धाम ध्वनिभिरवरुन्धानमणुभिः

समस्तं व्यस्तं त्वां शरणद गृणात्योमिति पदम्।।२७।।

त्रयीमिति। हे शरणद! ॐ इति पदं समस्तं समस्तरूपेण व्यस्तं खण्डरूपेणाक्षरविभागेन त्वां गृणाति स्तौति। किं कुर्व्वन्। अकाराद्यैस्त्रिभिरवर्णैरकारोकारमकारैरेतैरभिदधत् त्रयी ऋग्यजुःसामानि च। तिस्रो वृत्तीः त्रीन् स्वरान् उदात्तानुदात्तस्वरितान्। त्रिभुवनं त्रैलोक्यम् अथोऽनन्तरं त्रीन् सुरानपि ब्रह्मविष्णुरुद्रान्। अकारेण ऋगुदात्तस्वर्गब्रह्म(ह्मा)णः अभिधीयन्ते उकारेण यजुरनुदात्तमर्त्यवैष्णव(वाः) अभिधीयन्ते तथा मकारेण सामस्वरितपातालरुद्रा अभिधीयन्ते। किंविधम् ॐ मितिपदम्। ते तव तुरीयं धाम चतुर्थस्थानम् अणुभिः सूक्ष्मैर्ध्वनिभिरवरुन्धानं व्याप्नुवन्तम्। किम्भूतं धाम। तीर्णविकृति तीर्णा विकृतिर्येन तत्तीर्णविकृति विकाररहितमित्यर्थः। इदानीं नामाष्टकप्रतिपादनद्वारेण स्तुवन्नाह ।।२७।।

भवः शर्वो रुद्रः पशुपतिरथोग्रः सहमहां-

स्तथा भीमेशानाविति यदभिधानाष्टकमिदम्।

अमुष्मिन् प्रत्येकं प्रविचरति देव श्रुतिरपि

प्रियायास्मै धाम्ने प्रणिहितनमस्योऽस्मि भवते।।२८।।

भव इति। हे देव! यदेतद्भवान् यद्यभिधानाष्टकम् अमुष्मिन् नामाष्टके श्रुतिर्वेदः प्रत्येकम् एकमेकं प्रति। प्रविचरति वर्त्तते। इति हेतोः प्रियायास्मै धाम्ने पूर्वश्लोकप्रतिपादिताय ते रूपाय भवते तुभ्यं प्रणिहितनमस्योऽस्मि कृतनमस्कारोऽस्मि अथवा हे देव! भगवते तव प्रियायास्मै धाम्ने तुरीयतेजसे प्रणिहितनमस्योऽस्मि। इदानीं भगवतः प्रकटरूपतां प्रतिपादयन्नाह ।।२८।।

नमो नेदिष्ठाय प्रियदव दविष्ठाय च नमो

नमः क्षोदिष्ठाय स्मरहर महिष्ठाय च नमः।

नमो वर्षिष्ठाय त्रिनयन यविष्ठाय च नमो

नमः सर्वस्मै ते तदिदमतिसर्वाय च नमः।।२९।।

नम इति। नेदिष्ठायान्तिकतमाय शिवाय नमः निकटवर्त्तिने तुभ्यं नम इत्यर्थः। हे प्रियदव! प्रियं दवो धनं यस्य स तस्य सम्बुद्धिः। दविष्ठाय दूरतराय नमः शिवाय नमः तथा क्षोदिष्ठाय क्षुद्ररूपाय च नमः। हे स्मरहर! महिष्ठाय च महत्तराय नमः तथा वर्षिष्ठाय वृद्धतराय नमः। हे त्रिनयन! यविष्ठाय युवनरूपाय नमः तथा सर्वस्मै नमः अतिसर्वाय सर्वमतिक्रान्ताय तुभ्यं नमः अतिनमस्कार इत्यर्थः इदानीं साङ्ख्यपातञ्जलिप्रक्रियां स्तुवन्नाह ।।२९।।

बहुलरजसे विश्वोत्पत्तौ भवाय नमो नमः
प्रबलतमसे तत्संहारे हराय नमो नमः।
जनसुखकृते सत्वोत्पत्तौ मृडाय नमो नमः
प्रमहसि पदे निस्त्रैगुण्ये शिवाय नमो नमः।।३०।।

बहुल इति। रजोगुण उत्पत्तिहेतुस्तमोगुणनाशहेतुः सत्वगुणो हिते हेतुः। ईश्वरो यदा उत्पत्तिं करोति तदा रजोगुणस्वरूपो भवति यदा नाशयति तदा तमोगुणयुक्तो भवति यदा हितं करोति तदा सत्वगुणयुक्तो भवति एतदाश्रित्य हि विश्वोत्पत्तौ सृष्टिकर्त्तरि बहुलरजसेऽधिकरजोगुणाय नमो नमः। जगदुत्पत्तौ भवरूपत्वात्तदनुगुणेन भवशब्देन नमस्कारः कृतस्तत्संहारे जगन्नाशने प्रबलतमसेऽधिकतमोगुणाय हराय नमोनमः। संहारस्य नाशरूपत्वात्तदनुगुणेन हरशब्देन नमस्कारः कृतः सत्वोत्पत्तौ सत्यां जगत्पालनगुणोद्रेके सति जनसुखकृते हितकाराय मृडाय नमो नमः। मृडसुख इत्यस्य धातोः कर्त्तरि मृड इति रूपं सत्वगुणस्य सुरूपत्वात्तदनुगुणेन शब्देन नमस्कारः कृतः तथा प्रमहसि प्रकृष्टतेजसि निस्त्रैगुण्ये गुणत्रयातीते पदे स्थाने शिवाय नमो नमः यदा कर्त्तुः प्रवृत्तिस्तेन शिवशब्देन नमस्कारः कृतः नमो नम इति भक्त्या तेऽत्र वीक्षायां द्विर्वचनम्। इदानीमभिप्रेतार्थसिद्धौ सत्याम् आत्मीयमौत्सुक्यं परिहरन्नाह ।।३०।।

कृशपरिणति चेतः क्लेशवश्यं क्व चेदं
क्व च तव गुणसीमोल्लङ्घिनी शश्वदृद्धिः।
इति चकितममन्दीकृत्य मां भक्तिराधा-
द्वरद चरणयोस्ते वाक्यपुष्पोपहारम्।।३१।।

कृशेति। इदं मदीयं चेतः मानसं क्व किम्भूतं चेतः कृशपरिणति परिणामदुर्बलम्। तथा क्लेशवश्यम्। अविद्यास्मितारागद्वेषाभिनिवेशाः पञ्चक्लेशास्तेषां वश्यम्। विपरितज्ञानमविद्या। अभिन्नयोर्बुद्ध्यात्म-नोरेकत्र प्रीतिरस्मिता। सुखेष्वासक्ती रागः दुःखेष्वप्रीतिर्द्वेषः। अननुभूतादपि मरणादेस्त्रासोऽभिनिवेश इति क्लेशाः। तव ऋद्धिर्महिमा क्व किम्भूता ऋद्धिः। शश्वत् सर्वदा गुणसीमोल्लङ्घिनी गुणमर्यादामतिक्रान्ता इत्यनेन प्रकारेण चकितं भीतं मां हे वरद! ते तव चरणयोर्भक्तिरमन्दीकृत्य भीतिरहितं कृत्वा वाक्यपुष्पोपहारमात्रत्वात्। वाक्याण्येव पुष्पाणि तेषां पूजा तामकल्पयत् ।।३१।।

असितगिरिसमं स्यात् कज्जलं सिन्धुपात्रे

सुरतरुवरशाखा लेखनी पत्रमुर्वी।

लिखति यदि गृहीत्वा शारदा सर्वकालं

तदपि तव गुणानामीश पारं न याति।।३२।।

असितगिरिसममिति।।३२।।

असुरसुरमुनीन्द्रैरर्चितस्येन्दुमौले-

र्ग्रथितगुणमहिम्नो निर्गुणस्येश्वरस्य।

सकलगुणवरिष्ठः पुष्पदन्ताभिधानो

रुचिरमलघुवृत्तैस्तोत्रमेतच्चकार।।३३।।

असुरसुरमुनीन्द्रैरिति।।३३।।

अहरहरनवद्यं धूर्ज्जटेः स्तोत्रमेतत्

पठति परमभक्त्या शुद्धचित्तः पुमान्यः।

स भवति शिवलोके रुद्रतुल्यः सदात्मा

प्रचुरतरधनायुः पुत्रवान् कीर्त्तिमांश्च।।३४।।

अहरहरनवद्यमिति।।३४।।

दीक्षा दानं तपस्तीर्थं होमयागादिकाः क्रियाः।

महिम्नस्तवपाठस्य कलां नार्हन्ति षोडशीम्।।३५।।

समाप्तमैदिदं {?} स्तोत्रं सर्वमीश्वरवर्णनम्।

अनूपमं मनोहारि पुण्यं गंधर्वभाषितम्।।३६।।

महेशान्नापरो देवो महिम्नो नापरा स्तुतिः।

अघोरान्नापरो मन्त्रो नास्ति तत्त्वं गुरोः परम्।।३७।।

कुसुमदशननामा सर्वगन्धर्वराजः

शशिधरवरमौलेर्देवदेवस्य दासः।

सुगुरुनिजमहिम्नो भ्रष्ट एवास्य रोषात्

स्तवनमिदमकार्षीद्दिव्यदिव्यं महिम्नः।।३८।।

सुरवरमुनिपूज्यं स्वर्गमोक्षैकहेतुं

पठति यदि मनुष्यः प्राञ्जलिर्नान्यचेताः।

व्रजति शिवसमीपं किन्नरैस्तूयमानः

स्तवनमिदममोघं पुष्पदन्तप्रणीतम्।।३९।।

श्रीपुष्पदन्तमुखपङ्कजनिर्गतेन

स्तोत्रेण किल्बिषहरेण हरप्रियेण।

कण्ठस्थितेन पठितेन समाहितेन

सुप्रीणितो भवति भूतपतिर्महेशः ।।४०।।

इति श्रीपुष्पदन्ताचार्य्यविरचितं महिम्नाख्यं स्तोत्रं समाप्तम्।। शं शश्वरद्भवतु पाठकस्येशप्रसादात्।

।श्रीः।।

## उपसंहारः

शिवमहिम्नःस्तोत्रम् अतीव प्रसिद्धम् अस्ति। अस्य स्तोत्रस्य अर्थघटनाय अनेकाः टीकाः विरचिताः सन्ति। तासु काश्चन उपलब्धाः काश्चन अप्रकाशिताः च सन्ति। अप्रकाशितानां टीकानाम् उपरि संशोधनम् आवश्यकम् इति विचारं कृत्वा आचार्यश्रीकैलाससागरसूरीज्ञानमन्दिर कोबातः प्राप्तायाः अज्ञातकर्तृकायाः शिवमहिम्नःस्तोत्रटीकायाः समीक्षितं पाठसम्पादनम् अत्र कृतम् अस्ति। अनया टीकया शिवमहिम्नःस्तोत्रस्य विशिष्टम् अर्थघटनं तथा केचन पाठभेदाः अपि अस्माकं पुरतः स्थापिताः सन्ति। लघुशोधप्रबन्धस्य मर्यादां दृष्ट्वा एकस्याः टीकायाः समीक्षितं पाठसम्पादनं कृतम्। भविष्यत्काले इदं संशोधनम् अन्येषां शोधार्थिनां कृते उपयोगि भवेत् इति आशा अस्ति।

# सन्दर्भग्रन्थसूची


| क्रमः | ग्रन्थस्य नाम | लेखकः/ सम्पादकः | प्रकाशनम् |
|---|---|---|---|
| १. | संस्कृत पाण्डुलिपिओ अने समीक्षित पाठसम्पादन-विज्ञान | वसन्तकुमार मनुभाई भट्ट | सरस्वती पुस्तक भण्डार, हाथीखाना, रतनपोळ, अमदावाद-380001 ई.स.2009-2010 |
| २. | शोधप्रविधिः | प्रो.देवेन्द्रनाथः पाण्डेयः, डॉ. ललितः पटेलः | जगदीश संस्कृत पुस्तकालय, जयपुर ई.स.2014 |
| ३. | संस्कृतशोधप्रविधिः | डॉ.सत्यनारायण आचार्यः | सिद्धमहावीरपटणा, पुरी, ओडिशा ई.स.2012 |
| ४. | भारतीय पुरालिपि मञ्जुषा | डॉ.उत्तमसिंहः | आचार्य श्रीकैलाससागरसूरि ज्ञानमन्दिर श्रीमहावीर जैन आराधना केन्द्र,कोबा,गान्धिनगरम्-382007 ई.स.2016 वि.सं.2072 |
| ५. | संस्कृत साहित्य का इतिहास | डॉ.उमाशङ्कर शर्मा "ऋषि" | चौखम्बा भारती अकादमी, वाराणसी ई.स.2016 |
| ६. | कृष्णपण्डितविरचिता "कैवल्यदीपिका" | डॉ.जानकीशरणः आचार्यः | श्रीसोमनाथसंस्कृतयुनिवर्सिटी,वेरावलम् ई.स.2018 |
| ७. | चन्द्रशेखरचक्रवर्तिकृत-सन्दर्भदीपिकाटीकया | वसन्तकुमार मनुभाई भट्ट | न्यु भारतीय बुक कोर्पोरेशन,नई दिल्ली राष्ट्रीय पाण्डुलिपि मिशन,नई दिल्ली |

| | | | |
|---|---|---|---|
| | समलङ्कृतम्<br>अभिज्ञानशाकुन्तलम् | | ई.स.2013 |
| ८. | महिम्नस्तोत्रम्<br>आचार्यमधुसुदन-<br>कृतमधुसुदनीटीका-<br>समलङ्कृतम् | | चौखम्बा, संस्कृत संस्थान, वाराणसी<br>वि.सं. 2064 |
| ९. | संस्कृत वाङ्गमय का<br>बृहद् इतिहास<br>(चतुर्थखण्डः) | सम्पादकः<br>प्रो.राधावल्लभ<br>त्रिपाठी | उत्तरप्रदेश संस्कृत संस्थान, लखनऊ<br>ई.स. 1997 वि.सं.2053 |
| १०. | शिवमहिम्नःस्तोत्रस्य<br>अज्ञातकर्तृका टीका | अज्ञातः | प्राप्तिस्थानम्-<br>आचार्य श्रीकैलाससागरसूरि<br>ज्ञानमन्दिर<br>श्रीमहावीर जैन आराधना<br>केन्द्र,कोबा,गान्धिनगरम्-382007<br>ई.स.2019 |
| ११. | श्रीमद्वाल्मीकीयरामायणम् | - | गीताप्रेस गोरखपुर<br>ई.स.2009 |
| १२. | लौकिक संस्कृत साहित्य<br>का इतिहास | डॉ.जयकृष्णप्रसाद-<br>खण्डेलवाल | परिमल पब्लिकेशन,दिल्ली<br>ई.स.2009 |
| १३. | बृहत्स्तोत्ररत्नाकरः | तुकाराम जावजी | निर्णयसागरप्रेस-मुम्बई<br>ई.स.1912 |

| | | | |
|---|---|---|---|
| १४. | शिवमहिम्नःस्तोत्रम् | स्वामी विवेकानन्द सरस्वती | श्रीपरमार्थनिकेतन,ऋषिकेष ई.स.1960 |
| १५. | पाणिनीयशिक्षा | शिवराज आचार्य कौण्डिन्यायन | चौखम्बा विद्याभवन,वाराणसी ई.स.2014 |
| १६. | ऋग्वेद-संहिता | पं.रामगोविन्द त्रिपाठी | चौखम्बा सुरभारती प्रकाशन,वाराणसी ई.स.2003 |